दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिकशुक्लतृतीया
कार्तिक 27 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-11 ■ वर्ष-6 ■ अङ्क-16 | 1 | नवम्बर 12, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 नोएडा-ग्रेटरनोएडा-नगरयोः मध्ये 'एक्वा लाईन' मेट्रो-परियोजनायाः विस्ताराय केन्द्रीयमन्त्रिमण्डलस्य स्वीकृतिः

4 राष्ट्रपतिद्वारा ठियोग-नगरपरिषद् सम्मानिता, 'स्वच्छ-सर्वेक्षणे' हिमाचलप्रदेशेण वर्धितं गौरवम्

10 हृदयरोगः, हृदयाघातश्च-अलाब्धाः रसस्य सेवनविषये प्रचलितानां आक्षेपानां वैज्ञानिकं परीक्षणम्

लम्बितवादानां शीघ्रनिस्तारणाय केन्द्रसर्वकारस्य अभिनवा प्राथमिकी; सायंकालीन-न्यायालयानां सेवानिवृत्त-न्यायाधीशानां च भविष्यति उपयोगः



देवरिया / नवदेहलीदेशस्य विविधेषु न्यायालयेषु वर्षेभ्यः लम्बितानां कोटिशः वादानां शीघ्रनिस्तारणाय केन्द्रसर्वकारः एकां नूतनां व्यवस्थां प्रवर्तयितुं सज्जता करोति। अस्याः योजनायाः अन्तर्गतं नियमित-न्यायालयीन-कार्यवाह्याः पश्चात् सायंकाले अपि त्रिचतस्रः होराः (३-४ घंटे) यावत् न्यायालयानां संचालनं भविष्यति। आरम्भे 'सायंकालीन-न्यायालयस्य' (इवनिंग कोर्ट) प्रायोगिक-परियोजना (पायलट प्रोजेक्ट) कार्यान्विता भविष्यति। एतदतिरिच्य, सेवानिवृत्त-न्यायाधीशानां सेवाग्रहणाय तथा च दशकेभ्यः लम्बितानां वादानां चिह्नाङ्कनं कृत्वा तेषां प्राथमिकतायाः आधारेण श्रवणाय अपि सज्जता क्रियते। केन्द्रीय-विधि-न्याय-राज्यमन्त्रिणा (स्वतन्त्रप्रभारः) श्रीअर्जुनराममेघवालमहोदयेन बुधवासरे देवरिया-जनपदे पत्रकारैः सह वार्तालापे इयं सूचना प्रदत्ता। केन्द्रीयमन्त्रिणा उक्तं यत् देशस्य न्यायिकव्यवस्थायाः पुरतः लम्बितवादानां भारः एका महती समस्या अस्ति। वर्तमाने सर्वोच्चन्यायालये ९६ सहस्राधिकाः, देशस्य २५ उच्चन्यायालयेषु प्रायः ७० लक्षं (७० लाख) तथा च जनपद-अधीनस्थ-न्यायालयेषु प्रायः चतस्रः कोटयः त्रिंशत् लक्षं (४.३० करोड़) वादाः लम्बिताः सन्ति।

प्रमुखाः बिन्दवः –

वादानां 'एजिंग एनालिसिस' (काल-विश्लेषणम्): सर्वकारेण प्रथमवारं लम्बितवादानां काल-विश्लेषणं कारयितुं प्राथमिकता क्रियते। अनेन ज्ञायते यत् कः वादः कतिभ्यः वर्षेभ्यः लम्बितः अस्ति। २०, ३०, ४० वर्षपुरातनानां वादानां चिह्नाङ्कनं कृत्वा वादसूच्यां (कॉज लिस्ट) तेभ्यः प्राथमिकता दीयते। बहुषु वादेषु साक्षिणां मृत्युः अपि अभवत्, तथापि श्रवणं प्रचलति। धनादेश-अनादरणस्य (चेक बाउंस) वादानां संख्या अपि अत्यधिका वर्तते।

सायंकालीन-न्यायालयानां व्यवस्थाः नियमित-न्यायालयानां कार्यसमाप्तेः पश्चात् सायंकाले ३-४ होराः यावत् अतिरिक्तं श्रवणं भविष्यति, येन सामान्यजनेभ्यः समये न्यायः प्राप्येत।

सेवानिवृत्त-न्यायाधीशानां नियुक्तिः: संविधाने निहितानां प्रावधानानाम् आधारेण लम्बितवादानां भारं न्यूनीकर्तुं सेवानिवृत्त-न्यायाधीशानां सेवाः अपि ग्रहीष्यन्ते।

केन्द्रीयमन्त्रिणा स्पष्टीकृतं यत् पुरातनवादानां चिह्नाङ्कनम्, अतिरिक्तन्यायालयानां व्यवस्था, आधुनिकप्रौद्योगिक्याः (तकनीक) प्रयोगः च इति एतैः उपायैः न्यायिकप्रक्रियायां तीव्रताम् आनेतुं सर्वकारः सततं प्रयतते।

जनहिते सर्वकारीय-कर्मचारिणाम् अनिवार्य-सेवानिवृत्तेः विषये सर्वकारस्य व्यापकः अधिकारः अस्ति – सर्वोच्चन्यायालयः



नवदेहली। सर्वकारीय-कर्मचारिणाम् अनिवार्य-सेवानिवृत्ति-सम्बद्धे एकस्मिन् महत्त्वपूर्णनिर्णये सर्वोच्चन्यायालयेन स्पष्टीकृतं यत् सर्वकारस्य पार्श्वे जनहिते कर्मचारिणः समयात् पूर्वं सेवानिवृत्तान् कर्तुं व्यापकः अधिकारः वर्तते। शीर्षन्यायालयेन उक्तं यत् प्रशासनिकदक्षतायाः संरक्षणाय तथा च येषां कर्मचारिणाम् उपयोगितायाः, कार्यक्षमतायाः, निष्ठायाः (ईमानदारी) वा विषये प्रश्नाः सन्ति, तादृशान् कर्मचारिन् सेवातः अपसारयितुम् इयं व्यवस्था निर्मिता अस्ति।न्यायालयेन एतदपि स्पष्टं कृतं यत् यदि निर्णयः दुर्भावनापूर्णः, स्वेच्छाचारी (मनमाना), पर्याप्त-आधारं विना वा गृहीतः स्यात्, तर्हि तस्य न्यायिकसमीक्षा (Judicial Review) सम्भवति। सर्वोच्चन्यायालयेन अयं निर्णयः छत्तीसगढ-सर्वकारस्य द्वयोः कर्मचारिणोः अपील-याचिके निरस्तं कुर्वन् श्रावितः। ताभ्यां कर्मचारिभ्यां जनहिते प्रदत्ताम् अनिवार्य-सेवानिवृत्तिं न्यायालये चुनौती प्रदत्ता आसीत्।

सुभाषितम्

अपि संपूर्णता युक्तैः कर्तव्यः सुहृदो बुधैः।
नदीशः परिपूर्णोऽपि चन्द्रोदयमपेक्षते।।

भावार्थः- यद्यपि विद्वान् व्यक्ति सर्वगुण संपन्न होते हैं फिर भी किसी विशेष कार्य को करने के लिए अपने मित्रों की सहायता की आवश्यकता पडती है, जैसे कि समुद्र को चन्द्रमा की आवश्यकता (ज्वार उत्पन्न करने के लिए) पड़ती है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७११९ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैल:, डॉ.अमित शर्मा, डॉ.नरेन्द्राणा, प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा



निर्णयस्य प्रमुखाः बिन्दवः –

सक्षमप्राधिकारिणः अधिकारः: श्रवणकाले न्यायालयेन उक्तं यत् कस्यापि कर्मचारिणः निष्ठायाः, कार्यकुशलतायाः, दक्षतायाः, समग्रसेवाभिलेखस्य (सर्विस रिकॉर्ड) च आकलनं कर्तुं सक्षमप्राधिकारिणः अधिकारः अस्ति।

समानतायाः अधिकारस्य व्याख्याः केवलम् एतस्मिन् आधारे कार्यवाह्यै चुनौती दातुं न शक्यते यत् समान-सेवाभिलेखयुक्तः अन्यः कश्चन कर्मचारी सेवायां स्थापितः अस्ति। न्यायालयेन स्पष्टीकृतं यत् संविधाने प्रदत्तः समानतायाः अधिकारः एतत् न कथयति यत् यदि पूर्वं कस्मिंश्चित् प्रकरणे त्रुटिः अभवत्, तर्हि सैव त्रुटिः अग्रे अपि अनुवर्तेत। पुरातनप्रकरणस्य त्रुटिम् आधारीकृत्य भविष्ये तादृशी एव त्रुटिः न करणीया।

न्यायिकहस्तक्षेपस्य सीमाः सर्वोच्चन्यायालयेन स्पष्टं कृतं यत् सर्वकारस्य अधिकारः असीमितः नास्ति। यदि अनिवार्य-सेवानिवृत्तेः निर्णयः प्रमाणं विना, सम्यक् विचारं विना, स्पष्टतया स्वेच्छाचारितया दुर्भावनया वा प्रेरितः स्यात्, तर्हि न्यायालयाः हस्तक्षेपं कर्तुं शक्नुवन्ति। परन्तु यत्र निर्धारितप्रक्रियायाः पालनं कृतं स्यात्, अभिलेखानाम् आधारेण च निर्णयः गृहीतः स्यात्, तत्र न्यायालयः सामान्यतः हस्तक्षेपं न करिष्यति।

नोएडा-ग्रेटरनोएडा-नगरयोः मध्ये 'एक्वा लाईन' मेट्रो-परियोजनायाः विस्ताराय केन्द्रीयमन्त्रिमण्डलस्य स्वीकृतिः



नवदेहली। नोएडा-ग्रेटरनोएडा-नगरयोः मध्ये मेट्रो-सम्पर्कं (कनेक्टिविटी) वर्धयितुं महत्त्वपूर्णं निर्णयं स्वीकुर्वता केन्द्रसर्वकारेण नोएडा-मेट्रो-रेल-परियोजनायाः 'एक्वा लाईन' इत्यस्याः विस्ताराय स्वीकृतिः प्रदत्ता अस्ति। प्रधानमन्त्रिणः श्रीनरेन्द्रमोदीमहोदयस्य अध्यक्षतायां बुधवासरे अत्र सम्पन्नायां केन्द्रीयमन्त्रिमण्डलस्य उपवेशने एतत्सम्बद्धाय प्रस्तावाय अनुमोदनं प्रदत्तम्।उपवेशनानन्तरं सूचना-प्रसारणमन्त्रिणा श्रीअश्विनीवैष्णवमहोदयेन संवाददाता-सम्मेलने सूचितं यत् मन्त्रिमण्डलस्य अस्य निर्णयस्य अन्तर्गतं नोएडा सेक्टर-५१ तः ग्रेटर नोएडा सेक्टर-०४ पर्यन्तम् ८.४४९ किलोमीटर-परिमितः दीर्घः नूतनः मेट्रो-मार्गः (कॉरिडोर) निर्मास्यते। तेन उक्तं यत् इयं परियोजना चतुर्षु वर्षेषु पूर्णा भविष्यति। अस्मिन् मार्गे ०५ उत्थापित-स्थानकानि (एलिवेटेड स्टेशन) भविष्यन्ति। अस्य मार्गस्य आरम्भानन्तरं नोएडा-ग्रेटरनोएडा-नगरयोः सक्रिय-मेट्रो-जालस्य कुलदैर्घ्यं वर्धित्वा ७१.८७८ किलोमीटर-परिमितं भविष्यति।

प्रधानमन्त्रिणः सन्देशः –

प्रधानमन्त्रिणा श्रीनरेन्द्रमोदीमहोदयेन अनन्तरं सामाजिकमाध्यमे (सोशल मीडिया) एकस्मिन् सन्देशे उक्तं यत्, "यथा-यथा नोएडा-ग्रेटरनोएडा-नगरयोः विकासः भवति, तर्हि जनानां प्रतिदिनस्य आवागमनं दीर्घं किमर्थं भवेत्? नोएडा-ग्रेटरनोएडा-नगरयोः निवासिकृते एषः शुभसमाचारः अस्ति यत् मन्त्रिमण्डलेन 'एक्वा लाईन' मेट्रो-मार्गस्य विस्ताराय स्वीकृतिः प्रदत्ता अस्ति।"

प्रमुखाः लाभाः –

सुगमः सम्पर्कः: कार्यालयान्, विद्यालयान्, चिकित्सालयान् व्यावसायिककेन्द्राणि च प्राप्तुं सौकर्यं भविष्यति।

यातायात-नियन्त्रणम्: मार्गेषु यातायातस्य सम्मर्दे (भीड़भाड़) न्यूनता आगमिष्यति।

समयस्य रक्षणम्: जनानाम् आवागमने व्यतीतस्य समयस्य न्यूनता भविष्यति।

निश्चितरूपेण इयं परियोजना सम्पर्कसुविधां वर्धयितुं जनजीवनं च अधिकं सुगमं कर्तुं दिशि एकं महत्त्वपूर्णं पदम् अस्ति।

कुलगाम-जनपदे सुरक्षाबलेषु आतंकवादिनाम् आक्रमणम्; केन्द्रीय-आरक्षि-बलस्य द्वौ सैनिकौ आहतौ



श्रीनगरम्जम्मू-कश्मीर-प्रदेशस्य कुलगाम-जनपदे बुधवासरे मध्याह्ने अज्ञातैः आतंकवादिभिः केन्द्रीय-आरक्षि-बलस्य (सी.आर.पी.एफ.) सैनिकानाम् उपरि अन्धाधुन्धं गोलिकाप्रहारः कृतः, येन द्वौ सैनिकौ आहतौ (घायल) अभवताम्। आधिकारिक-सूत्राणाम् अनुसारम् इयं घटना मध्याह्ने प्रायः २:१५ वादने तदा अभवत्, यदा कुलगाम-जनपदे एकस्मिन् मार्गनिरोधस्थाने (नाका) नियुक्तानां सुरक्षाकर्मिणाम् उपरि द्विचक्रिकया (मोटरसाइकिल) आगताः अज्ञाताः आक्रमणकारिणः सहसा गोलिकाः अचालयन्। घटनायाः अनन्तरं सद्यः एव आक्रमणकारिणः घटनास्थलात् पलायिताः अभवन्।

प्रमुखाः बिन्दवः –

आहतसैनिकयोः चिकित्सा: गोलिकाप्रहारे आहतौ द्वौ अपि सैनिकौ तत्काल-उपचाराय समीपस्थस्य अनन्तनाग-जनपदस्य एकस्मिन् चिकित्सालये स्थानान्तरितौ स्तः।

अन्वेषण-अभियानम्: घटनायाः अनन्तरं सद्यः एव सुरक्षाबलैः सम्पूर्णस्य क्षेत्रस्य परिवेष्टनं (घेराबंदी) कृत्वा आक्रमणकारिणाम् अन्वेषणार्थं सघनम् अभियानम् आरब्धम् अस्ति।

फारस-खातिकायां तैलवाहक-पोते प्रक्षेपास्त्रेण आक्रमणम्; एकः भारतीयः नाविकः आहतः, सर्वे अन्ये सुरक्षिताः



नवदेहली। केन्द्रीयमन्त्रिणा श्रीसर्बानन्दसोनोवालमहोदयेन बुधवासरे सूचितं यत् फारस-खातिकातः (फारस की खाड़ी) दुबई-नगरं प्रति गच्छति लाइबेरिया-ध्वजयुक्ते एकस्मिन् तैलवाहक-पोते (ऑयल टैंकर) केनचित् वस्तुना (प्रोजेक्टाइल) आक्रमणं कृतम् अस्ति। अस्यां घटनायां चालकदलस्य (क्रू) चत्वारः सदस्याः आहताः (घायल) अभवन्, येषु एकः भारतीयः नागरिकः अपि अन्तर्भवति।इयं घटना मङ्गलवासरे तदा अभवत्, यदा 'एम.टी. फुजैराह एनर्जी' (MT Fujairah Energy) नामकं बृहत् तैलवाहकं जलयानम् (क्रूड कैरियर) अल-रुवाइस-स्थानात् दुबई-नगरं प्रति गच्छत् आसीत्।

प्रमुखाः बिन्दवः –

आहतस्य नाविकस्य स्थितिः: श्रीसोनोवालमहोदयेन सामाजिकमाध्यमे (सोशल मीडिया) सूचनां प्रसारयन् उक्तं यत् आक्रमणे चालकदलस्य चत्वारः सदस्याः आहताः जाताः। तेषु एकः भारतीयः नागरिकः आसीत्, यस्य सामान्याः क्षतयः अभवन्। सः अग्रिम-चिकित्सीय-परीक्षणाय सुरक्षितं तटम् आनीतः अस्ति।

अन्येषां नाविकानां सुरक्षाः मन्त्रिणा स्पष्टीकृतं यत् चालकदलस्य अवशिष्टाः १८ सदस्याः, येषु जलयाने स्थिताः पञ्च अन्ये भारतीयाः नाविकाः अपि सन्ति, ते सर्वे पूर्णतया सुरक्षिताः सन्ति तथा च सर्वेषां सम्पर्कः स्थापितः अस्ति।

महाराष्ट्रराज्यस्य लाडघर-गुहागर-श्रीवर्धन-समुद्रतटैः प्राप्तं प्रतिष्ठितम् 'ब्लू फ्लैग' पुरस्कारम्



हिमसंस्कृतवार्ताः - डॉ नरेन्द्राणा सिरमौरः ।

महाराष्ट्रस्य रत्नागिरिमण्डलस्य लाडघर-गुहागर-समुद्रतटौ तथा च रायगडमण्डलस्य श्रीवर्धन-समुद्रतटः २०२६-२७ वर्षस्य कृते प्रतिष्ठितम् अन्तर्राष्ट्रीयं 'ब्लू फ्लैग' पुरस्कारं प्राप्तवन्तौ। ध्यातव्यं वर्त्तते यत् महाराष्ट्रराज्येन प्रथमवारम् एतादृशम् अन्तर्राष्ट्रीयसम्मानं लब्धम्। एते समुद्रतटाः पर्यावरणसंरक्षणम्, स्वच्छता, जलस्य गुणवत्ता, जैवविविधतायाः सुरक्षा, पर्यटकानाम् सुरक्षा, मूलभूतसुविधाः तथा च शाश्वतपर्यटनप्रबन्धनम् इत्यादीनाम् अन्तर्राष्ट्रीयमानकानां पूर्तिं कृतवन्तः। पर्यावरण-जलवायुपरिवर्तनमन्त्री पंकजा मुण्डे अस्यां उपलब्धौ सन्तोषं व्यक्तवती अवदत् यत् - अनेन जागतिकपर्यटनमानचित्रे महाराष्ट्रस्य ख्यातिं सुदृढा भविष्यति, स्थानीयस्तरे च उद्योग-वृत्यावसराणां प्रवर्धनं भविष्यति।

रविः खरिडेहालः - बेङ्गलूरु।

"डी पी आई आई टी इति विभागः आयाताश्रितानां १०० उत्पादानाम् सूचीकृतवान्"

"डी पी आई आई टी" - इत्युक्ते - उद्योग-आन्तरिकवाणिज्य-संवर्धन-विभागः । विभागस्य अस्मात् उपक्रमात् एतेषां १०० उत्पादानाम् निर्माणं वित्तवर्षे २०२७-२८ तमस्य वर्षस्य आयव्ययपत्रे प्रवर्धनं प्राप्तुं शक्नोति। आयव्ययपत्रे समर्थन-उपायेषु मध्यस्थाः पूंजी-वस्तूनि च सन्ति । आन्तरिक-उत्पादनात् ये आयाताः प्रतिस्थापिताः भवितुम् अर्हन्ति ते वाहन-घटकाः, रसायनानि, यन्त्राणि च इत्यादिभ्यः क्षेत्रेभ्यः सन्ति । सूचीं निर्मातुं निजीक्षेत्रं सर्वकारीयक्षेत्रं च सम्मिलितम् आसीत् ।यन्त्राणां आयातः १५.५% वर्धितः अस्ति । रसायनस्य आयातः १०.५% वर्धितः, परिवहनसाधनानाम् आयातः ९.२१% वर्धितः अस्ति । स्वदेशीयनिर्माणं वर्धयितुं सर्वकारः उपक्रमानाम् एकां श्रृङ्खलां गृह्णाति। पीएलआई योजना, पीएम गतिशक्ति योजना, "भव्य" योजना च आयातप्रतिस्थापनार्थं आवश्यकानि प्रोत्साहनं प्रदातव्यानि। भव्य इत्युक्ते - भारत-औद्योगिक-विकास-योजना ।

शीतकालाय विधिवत् पिहितानि श्रीकेदारनाथधाम्नः कपाटानि; शीतकालीन-गद्दीस्थलं प्रति प्रस्थिता भगवतः पञ्चमुखी डोली



देहरादूनम्। उत्तराखण्डराज्यस्य रुद्रप्रयाग-जनपदस्य उच्च-हिमाच्छादित-पर्वतशृङ्खलासु स्थितस्य विश्वप्रसिद्धस्य एकादश-ज्योतिर्लिङ्गस्य श्रीकेदारनाथधाम्नः कपाटानि बुधवासरे प्रातः सार्धाष्टवादने (८:३० वादने) पूर्वपरम्परानुसारं भ्रातृद्वितीयायाः (भैयादूज) अवसरे विधि-विधानेन मन्त्रोच्चारणेन च सह शीतकालाय पिहितानि (बन्द) अभवन्। अस्मिन् मङ्गलमये अवसरे श्रीबदरीनाथ-केदारनाथ-मन्दिर-समितेः (बी.के.टी.सी.) अध्यक्षः श्रीहेमन्तद्विवेदीमहोदयः तथा च पञ्चसहस्राधिकाः श्रद्धालवः कपाटपिधानस्य साक्षिणः अभवन्। उल्लेखनीयम् अस्ति यत् अस्मिन् यात्रावर्षे अद्यावधि ऐतिहासिकया सङ्ख्यया सार्धैकोनविंशति-लक्षं (१९.५० लाख) तीर्थयात्रिभिः श्रीकेदारनाथधाम्नः दर्शनं कृतम् अस्ति।कपाटपिधानस्य अवसरे श्रीमन्दिरं विविधैः पुष्पैः अलङ्कृतम् आसीत्। दानदातृभिः तथा च भारतीय-तिब्बत-सीमा-पुलिस-बलेन (आई.टी.बी.पी.) श्रद्धालुभ्यः भण्डाराणां (अन्नक्षेत्राणां) आयोजनं कृतम्। विगतदिनेषु समीपस्थेषु पर्वतेषु हिमपातकारणात् श्रीकेदारनाथे शीतं प्रवर्तते। अद्यैव भगवतः केदारनाथस्य चल-विग्रह-पञ्चमुखी-डोली सेनायाः वाद्यवृन्दस्य भक्तिमयीभिः ध्वनिभिः समारोहपूर्वकं 'जय श्री केदार' इति उद्घोषैः सह प्रथमविश्रामस्थलं रामपुरं प्रति प्रस्थिता अभवत्।

प्रमुखाः बिन्दवः –

पञ्चमुखी-डोल्याः यात्राक्रमः: बी.के.टी.सी.-मीडिया-प्रभारी डॉ. हरीशगौड़महोदयेन सूचितं यत् १२ नवम्बर दिनाङ्के गुरुवासरे पञ्चमुखी-डोली विश्वनाथमन्दिरं गुप्तकाशीं प्राप्स्यति तथा च १३ नवम्बर दिनाङ्के शुक्रवासरे शीतकालीन-गद्दीस्थलं श्रीओंकारेश्वरमन्दिरम् उखीमठं प्राप्स्यति। तेन उक्तं यत् कपाटपिधानप्रक्रियायाः अन्तर्गतं विगतशनिवासरे ७ नवम्बर दिनाङ्के भगवतः केदारनाथस्य रक्षकस्य श्रीभकुण्टभैरवनाथस्य कपाटानि शीतकालाय पिहितानि अभवन्।

कपाटपिधानस्य धार्मिकप्रक्रियाः भ्रातृद्वितीयायाः अवसरे श्रीकेदारनाथमन्दिरं प्रातः सार्धत्रिवादने (३:३० वादने) श्रद्धालुनां दर्शनार्थम् उद्घाटितम्। पञ्चवादने कपाटपिधानस्य प्रक्रिया आरब्धा। अर्चकेन टी. गङ्गाधरलिङ्गमहोदयेन धर्माधिकारिणाम् आचार्य-वेदपाठिनाम् उपस्थितौ भगवतः केदारनाथस्य स्वयम्भू-शिवलिङ्गाय शृङ्गाररूपात् समाधिरूपं प्रदत्तम्। स्थानीयपुष्पैः ब्रह्मकमलैः भस्मना च शिवलिङ्गम् आच्छादितम्। तदनन्तरं गर्भगृहस्य कपाटानि पिहितानि अभवन् तथा च भगवतः पञ्चमुखी-डोली सभामण्डपात् बहिः मन्दिरपरिसरम् आगता। अस्मिन् अवसरे सम्पूर्णः मन्दिरपरिसरः 'जय श्री केदार' 'ॐ नमः शिवाय' इति उद्घोषैः गुञ्जितः अभवत्। सार्धाष्टवादने मुख्यमन्दिरस्य कपाटानि पिहितानि जातानि।

प्रमुखोपस्थितिः: अस्मिन् अवसरे बी.के.टी.सी.-उपाध्यक्षः विजयकप्रवाणः, जिलाधिकारी विशालमिश्रः, सदस्याः महेन्द्रशर्मा, देवीप्रसाददेवली, नीलमपुरी, प्रह्लादपुष्पवाणः, डॉ. विनीतपोस्ती, केदारसभा-अध्यक्षः राजकुमारतिवारी, मुख्यकार्याधिकारी सोहनसिंहराङ्गड़ः, मुख्यप्रभारी-अधिकारी विपिनतिवारी, मुख्यप्रशासनिक-अधिकारी डी.एस. भुजवाणः सहितं जिलाप्रशासनस्य, आरक्षिबलस्य, आई.टी.बी.पी., एस.डी.आर.एफ. इत्यादीनाम् अधिकारिणः सैनिकाः च उपस्थिताः आसन्।

औद्योगिक-निर्माण-अपशिष्टानां पुनः उपयोगाय संयुक्तप्रौद्योगिक्याः विकासे भारत-नॉर्वे-देशयोः मध्ये संवादः



नवदेहली।भारत-नॉर्व-देशाभ्यां 'फ्लाइ ऐश' (उड्डयन-भस्म), 'स्टील स्लैग' (लौह-किट्टम्), 'रेड मड' (रक्तपङ्कः) तथा च निर्माण-विध्वंस-कार्येभ्यः निर्गतानाम् अवकराणां (मलबा) संसाधनं कृत्वा मार्गनिर्माण-सामग्री, 'जियोपॉलीमर कंक्रीट' इत्यादीनि उपयोगिनि निर्माण-उत्पादानि सज्जीकर्तुं संयुक्तप्रौद्योगिक्याः विकासस्य सम्भावनानां विषये विचारविमर्शः कृतः अस्ति। वैज्ञानिक-औद्योगिक-अनुसन्धान-परिषदा (सी.एस.आई.आर.) नॉर्वे-देशस्य अनुसन्धान-संस्थानेन 'सिन्टेफ' (SINTEF) तथा च नॉर्वे-देशस्य अनुसन्धान-परिषदा सह मिलित्वा अत्र 'सीमेण्ट-निर्माण-क्षेत्रे अपशिष्टात् संसाधन-समाधानम्' इति विषये भारत-नॉर्वे-संवादस्य आयोजनं कृतम्। अस्मिन् संवादे सी.एस.आई.आर.-संस्थायाः विविधानां प्रयोगशालानां प्रतिनिधयः, नॉर्वे-देशस्य वैज्ञानिकाः, नियामकसंस्थाः तथा च सीमेण्ट-निर्माण-उद्योगस्य प्रतिनिधयः सहभागिनः अभवन्।

संवादस्य प्रमुखाः उद्देश्याः बिन्दवः च –

संयुक्त-अनुसन्धानं प्रौद्योगिकी-सहयोगः चः आधिकारिकसूचनानुसारम् अस्य संवादस्य उद्देश्यम् औद्योगिक-निर्माण-अपशिष्टानां पुनः उपयोगः, तेषां सतत-प्रबन्धनं तथा च तेभ्यः उपयोगिनः निर्माणसामग्र्याः निर्माणार्थं संयुक्त-अनुसन्धानस्य प्रौद्योगिकी-सहयोगस्य च सम्भावनानाम् अन्वेषणम् आसीत्।

हरित-रणनीतिक-सहभागिताः इयं पहलः भारत-नॉर्वे-देशयोः मध्ये 'हरित-रणनीतिक-सहभागितायाः' (ग्रीन स्ट्रैटेजिक पार्टनरशिप) अन्तर्गतं चक्रीय-अर्थव्यवस्थां, स्वच्छप्रौद्योगिकीम् अनुसन्धानसहयोगं च वर्धयितुं सम्बद्धा अस्ति।

चुनौतीनां समाधानं च विचारः: चर्चायां निर्माण-विध्वंस-अवशिष्टानां, स्टील स्लैग, फ्लाई ऐश, रेड मड इत्यादीनाम् औद्योगिक-अवशेषाणां प्रयोगः मार्गनिर्माणे, कंक्रीट-निर्माणे अन्यनिर्माणसामग्रीषु च कर्तुं सम्भावनासु विचारः कृतः। एतदतिरिच्य, एतेषाम् अपशिष्टानां प्रसंस्करणे, तकनीकी-मानकेषु, आर्थिक-व्यवहार्यतायां तथा च आपणेषु (बाजार) स्वीकार्यतायां विद्यमानानां चुनौतीनां विषये अपि गहनं चिन्तनम् अभवत्।

टाइगर श्राफ-गोलिकाण्डः ५ अभियुक्तैः १६ नवम्बर-पर्यन्तम् आरक्षक-संरक्षणम् लब्धम्



हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः ।

मुम्बई-नगरस्य विशेषः महाराष्ट्र-संगठित-अपराध-नियन्त्रण-अधिनियमः (एम.सी.ओ.सी.ए) न्यायालयः अभिनेतुः टाइगर-श्राफस्य उपरि गुलीकाप्रहार-प्रकरणे अभियुक्तस्य मुख्य-शूटर-सहितस्य पञ्च-अभियुक्तानाम् आरक्षक-संरक्षणम् (पुलिस-रिमाण्ड्) १६ नवम्बर-दिनाङ्कं यावत् वर्धितवती। आरक्षकाः (पुलिस) अन्विष्यमाणस्य गण-प्रमुखस्य अनिल-पण्डितस्य सम्बन्धिन्याः सुनेहा-पण्डितायाः सम्मुखे एतेषाम् अभियाेिगनां प्रत्यक्ष-परीक्षणार्थम् अतिरिक्तायाः संरक्षण-अवधेः याचनाम् अकुर्वन्। सुनेहा १ नवम्बर-दिनाङ्के हरियाणा-राज्ये गृहीता अभवत्, सा च सम्प्रति आरक्षक-संरक्षणे वर्तते । आक्रमणकर्तुः फूल-सिंहस्य अल्पवयस्कता-विषये आरक्षकैः न्यायालये उक्तं यत् तस्य प्रकृत-वयसः प्रमाणम् आनेतुं तस्य पैतृक-स्थानं हरियाणा-राज्यं प्रति एकः दलः प्रेषितः अस्ति । अवधेयं वर्त्तते यत् मुम्बई-नगरस्य जुहू-क्षेत्रे एकस्य कन्दुक-क्रीडा-स्थलस्य समीपम् अभिनेतुः टाइगर-श्राफस्य यानं लक्ष्यीकृत्य १८ अक्टूबर-दिनाङ्के संजातायाः गोलिकाकाण्ड-घटनायाः सन्दर्भे आहत्य १३ जनाः गृहीताः सन्ति। एतेषु सप्त जनाः न्यायिक-संरक्षणे सन्ति, यदा तु अवशिष्टाः अभियुक्ताः १६ नवम्बर-दिनाङ्कं यावत् आरक्षक-संरक्षणे वर्तन्ते।

आईएनएस त्रिशूल-नौका मिस्र-देशस्य सफागा-नौसैनिकस्थले सफल-यात्रा सम्पन्ना



हिमसंस्कृतवार्ता। भारतीय-नौसेनायाः पोतः (जहाज) आईएनएस त्रिशूलः स्वस्य परिचालनान्तर्गतम् ९ नवम्बर-दिनाङ्के मिस्र-देशस्य सफागा-नौसैनिक-स्थलस्य स्वकीयां यात्रां पूर्णम् अकरोत्। अनया यात्रया भारत-मिस्र-देशयोः मध्ये प्रवर्धमाना रक्षा-समुद्री-सहभागिता च अधिका सुदृढा जाता। रक्षा-मन्त्रालयेन उक्तं यत् अस्मिन् वर्षे अप्रैल-मासे काहिरा-नगरे आयोजितायाः भारत-मिस्र-संयुक्त-रक्षा-समित्याः ११ तम्याः उपवेशनात् परं इयं यात्रा उभयोः देशयोः रक्षा-सम्बन्धान् अग्रे नेतुं महत्त्वपूर्णा अस्ति। सितम्बर २०२२ मध्ये कृतात् रक्षा-सहयोग-अभिसन्धि-ज्ञापनात् (MoU) पश्चात् तय-प्रतिबद्धताः अग्रे सारयितुम् अस्मिन् उपवेशने संस्थागतं प्रारूपम् सज्जीकृतम् आसीत्। वर्ष २०२३ मध्ये उभयोः देशयोः सम्बन्धेभ्यः 'रणनीतिक-सहभागिता' इति पदं दत्तम् आसीत्। यात्रायाः समये आईएनएस त्रिशूल-पोतस्य कमाण्डिङ्ग-अधिकारी मिस्र-देशस्य 'रक्त-सागर'-नौसैनिकस्थलस्य कमाण्डर-वर्येण रियर-एडमिरल-एम.डी. अब्देल-मकसूदेन सह मेलनम् अकरोत्। अस्मिन् अन्तरे स्वेज-खातायां समुद्री-सुरक्षायाः तथा रक्त-सागरस्य सामरिक-महत्त्वस्य उपरि चर्चा अभवत्। अस्याः यात्रायाः अवधौ भारत-मिस्र-देशयोः नौसेना-कर्मचारिणां मध्ये परस्परं संवादः तथा संयुक्त-निमज्जन-प्रशिक्षणम् (डावविङ्ग-ट्रेनिङ्ग) आयोजितम्। एताभिः गतिविधिभिः उभाभ्यां नौसेनाभ्यां स्वकीयान् परिचालन-अनुभवान् विभक्तुं श्रेष्ठाः कार्यप्रणालीः बोद्धुं तथा परस्परं सहयोगं वर्धयितुम् अवसरः प्राप्तः।

राष्ट्रपतिद्वारा ठियोग-नगरपरिषद् सम्मानिता, 'स्वच्छ-सर्वेक्षणे' हिमाचलप्रदेशेण वर्धितं गौरवम्



हिमसंस्कृतवार्ताः- शिमला।

मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू-महोदयस्य दूरदर्शिनि मार्गदर्शने नेतृत्वे च तथा हिमाचलप्रदेशं स्वच्छस्य, हरितस्य, निरन्तर-विकासस्य (सतत- विकासस्य) च आदर्शं विधातुं राज्यसर्वकारस्य कटिबद्धतायाः फलस्वरूपेण प्रदेशेन अपरा महत्त्वपूर्णा उपलब्धिः सम्प्राप्ता। 'स्वच्छ- सर्वेक्षण' अभियानस्य अन्तर्गततया हिमाचलप्रदेशेन देशस्य शीर्षविंशतिषु नगरीय-स्थानिकनिकायेषु स्वस्थानं सुनिश्चितं कृतम्। नगरीयविकासमन्त्रिणा विक्रमादित्यसिंहेन अद्य नवदेहल्याम् आयोजिते एकस्मिन् समारोहे राष्ट्रपतेः द्रौपदीमुर्मू- महोदयायाः हस्तात् अयं पुरस्कारः गृहीतः। इदं सम्मानं विशिष्टं महत्त्वं धारयति, यतो हि प्रथमवारं राष्ट्रपतेः गरिमामय्याम् उपस्थितौ प्रदेशाय अयं सम्मानः प्रदत्तः अस्ति।

विक्रमादित्यसिंहः प्रावोचत् यत् राज्यसर्वकारेण स्वच्छ- सर्वेक्षणस्य अन्तर्गततया नगरीय-स्थानिक- निकायानां समग्रप्रदर्शने परिष्कारम् आनेतुं निरन्तरं प्रयासाः विहिताः। सर्वकारस्य केन्द्रितोद्यमैः, समन्वितप्रयासैः, निरन्तरनिरीक्षणेन च नगरपरिषद् ठियोग हिमाचलप्रदेशस्य नाम प्रज्वलयितुम् सफला जाता। सः अवदत् यद् इयम् उपलब्धिः नगरीयविकासविभागस्य, नगरीयविकास- निदेशालयस्य, नगरीय-निकायानाम् अधिकारिणां कर्मचारिणां च, स्वच्छताकर्मिणां, सामान्यनागरिकाणां च समर्पणस्य सामूहिकानां प्रयासानां च फलम् अस्ति। एषा सिद्धिः नगरीय- स्वच्छता-मूलभूतसंरचनायाः (इन्फ्रास्ट्रक्चर) सुदृढीकरणाय, अपशिष्ट- प्रबन्धन- प्रणाल्याः परिष्काराय, जनसहभागितां निश्चेतुं, स्वच्छतायाः चिरस्थायिपरम्पराणां संवर्धनाय च राज्यसर्वकारस्य समर्पणं प्रतिपादयति।

नगरीयविकासमन्त्री अकथयत् यत् राज्यसर्वकारः नगरीय- स्वच्छता-व्यवस्थां सुदृढतरां विधातुं, सर्वान् नगरीय-स्थानिकनिकायान् स्वच्छतायाः, अपशिष्टप्रबन्धनस्य, जनसहभागितायाश्च उच्चमानकान् संस्थापयितुं प्रेरयितुं कटिबद्धः वर्तते, येन आगामिषु स्वच्छ-सर्वेक्षणेषु प्रदेशः श्रेष्ठतरं प्रदर्शनं कर्तुं शक्नुयात्। स्वच्छसर्वेक्षणं भारतसर्वकारस्य आवास-नगरकार्य-मन्त्रालयेन २०१६ तमे वर्षे प्रारब्धं देशस्य वार्षिक- स्वच्छता-मूल्याङ्कनस्य श्रेणीकरणस्य (रैङ्किङ्ग) च अभियानं वर्तते। अस्य उद्देश्यं नगरीय-स्थानिक-निकायानां मध्ये स्वस्थस्पर्धायाः संवर्धनं, समग्रदेशे स्वच्छतायाः, नैर्मल्यस्य, सततायाः अपशिष्ट-प्रबन्धनव्यवस्थायाश्च श्रेष्ठ-उपक्रमाणां प्रोत्साहनम् अस्ति। स्वच्छ-सर्वेक्षणस्य अधुनावधि आयोजितेषु नवसु संस्करणेषु हिमाचलप्रदेशेन निरन्तरं स्वोपस्थितिः दर्शिता, नगरीयस्वच्छता-, नैर्मल्य- दृढ- अपशिष्ट- प्रबन्धनक्षेत्रेषु कृतेभ्यः प्रयासेभ्यः विविधासु श्रेणीषु पुरस्कराः सम्मानाश्च अर्जिताः। अस्मिन् अवसरे नगरीयविकासविभागस्य निदेशकः नीरजकुमार-महोदयः अपि उपस्थितः आसीत्।

रामपुरे अन्ताराष्ट्रिय-लवी-महोत्सवस्य शुभारम्भः, राज्यपालः कविन्द्रगुप्तः अकरोत् उद्घाटनम्



हिमसंस्कृतवार्ताः- शिमला।

हिमाचलप्रदेशस्य ऐतिहासिकस्य प्रसिद्धस्य च अन्ताराष्ट्रिय- लवी- महोत्सवस्य बुधवासरे रामपुर- बुशहरनगरे विधिवत् शुभारम्भः अभवत्। पाटबङ्गला-प्राङ्गणे आयोज्यमानस्य चतुर्दिवसीयस्य महोत्सवावसरस्य उद्घाटनं प्रदेशस्य राज्यपालेन कविन्द्रगुप्तेन विहितम्। अस्मिन् अवसरे तेन किन्नौरी-विपण्यां पट्टिकाकर्तनं कृत्वा उत्सवः उद्घाटितः विविधानां विभागानां पक्षतः संस्थापितानां प्रदर्शनीनां चावलोकनं कृतम्।

किन्नौरी-उत्पादेषु विभागीय-प्रदर्शनीषु च प्रदर्शिता रुचिः

महोत्सवस्य उद्घाटनवेलायां राज्यपालः किन्नौरतः समागतानां वणिजां उत्पादकानां च पारम्परिक- उत्पादेषु विशेषरुचिं दर्शितवान्। सः किन्नौरी- वस्त्राणां, हस्तशिल्पस्य, पारम्परिक- वस्तूनां, स्थानिक- उत्पादानां च विषये विवरणं प्राप्तवान्। एतदतिरिच्य तेन विविधविभागानां प्रदर्शनीनां निरीक्षणं विधाय विभागीययोजनाः उपलब्धीश्च अपि ज्ञाताः।राज्यपालः कविन्द्रगुप्तः प्रावोचत् यत् उत्सवाः (मेलाः) युवकानां स्वावलम्बने महत्त्वपूर्णाः माध्यमाः सन्ति। ईदृशाः उपक्रमाः स्थानिक- उत्पादानां कृते विपणिं कल्पयितुं सहैव प्रदेशस्य समृद्धसंस्कृतेः परम्पराणां च संवर्धने मुख्यां भूमिकां निर्वहन्ति। सः जनान् स्वकीयायाः संस्कृतेः संस्काराणां च संरक्षणार्थम् आह्वयन् अवदत् यत् परम्पराः समाजस्य महत्तमा शक्तिः **क्रमशः...**



वर्तन्ते, एतासाम् अग्रिमवंशपर्यन्तं (अग्रिमपीढीं यावत्) प्रापणं सर्वेषां दायित्वम् अस्ति।

संस्कृतेः संरक्षणेन सह पर्यावरणरक्षणे बलम्

राज्यपालः अकथयत् यत् हिमाचलप्रदेशाय प्रकृत्या प्राकृतिकसौन्दर्यस्य अमूल्यम् उपहारं प्रदत्तम्। प्रदेशे विकासकार्यैः सहैव प्रकृतेः संरक्षणम् अपि अनिवार्यं वर्तते। तेन महोत्सवे स्वच्छतायाः परिपालनाय प्लास्टिक-वस्तूनां च उपयोगात् दूरे स्थातुम् अनुरोधः कृतः। सः प्रावोचत् यत् हिमाचलस्य सांस्कृतिक-निक्षेपस्य प्राकृतिकसौन्दर्यस्य च रक्षणं प्रत्येकस्य नागरिकस्य कर्तव्यं वर्तते। पारम्परिक-उत्पादानां कृते विपणि-व्यवस्थापनाय मेलायाश्च भव्य-आयोजनाय राज्यपालेन मेला-समितये, मण्डल-प्रशासनाय (जिला-प्रशासनाय), आरक्षिप्रशासनाय (पुलिस-प्रशासनाय), स्थानिक-संस्थाभ्यश्च शुभाशयाः दत्ताः। सः प्रदेशस्य संस्कृतेः परम्पराणां च संरक्षणाभ्यां सह हिमाचलस्य सुख- शान्ति-समृद्धिभिः विकासस्य नूतनोन्नतिं प्राप्तुं मङ्गलकामनां विहितवान्।**रामपुर- किन्नौर- तिब्बत- प्रदेशानां पुरातन- वाणिज्यिक- सम्बन्धानां प्रतीकः लवीमहोत्सवः**

अन्ताराष्ट्रिय-लवी-उत्सवः रामपुरस्य ऐतिहासिक-परिचयस्य शताब्दपुरातनानां (सदियों पुरातन) व्यापारिकपरम्पराणां च प्रतीकः अस्ति। अस्य उत्सवस्य सम्बन्धः रामपुर- किन्नौर- तिब्बत-प्रदेशानां मध्ये प्रवृत्तैः प्राचीनैः वाणिज्यसम्बन्धैः सह वर्तते। कालक्रमेण अस्य उत्सवस्य रूपं विस्तृतं जातं, तथापि अस्याः पारम्परिक-स्वरूपम् अद्यापि तथैव तिष्ठति। प्रतिवर्षम् उत्सवेऽस्मिन् प्रदेशस्य विविधक्षेत्रेभ्यः ऋते प्रतिवेशि-राज्येभ्यः सीमावर्ति-क्षेत्रेभ्यश्च वणिजः, शिल्पिनः, कृषकाः, फलोत्पादकाः, पर्यटकाश्च आगच्छन्ति। किन्नौरी-वस्त्राणां, हस्तशिल्पानां, पारम्परिक- वस्तूनाम्, अन्येषां च पार्वत्य-उत्पादानाम् अत्र महती अभ्यर्थना भवति। अयम् उपक्रमः स्थानिक- उत्पादकेभ्यः वणिग्भ्यश्च स्व-उत्पादानां प्रदर्शनाय विक्रयणाय च मञ्चं प्रददाति। आगामि-चतुर्दिनानि यावत् पाटबङ्गला-प्राङ्गणे क्रयविक्रयणैः, सांस्कृतिक-कार्यक्रमैः, विविधाभिः गतिविधिभिश्च मेलायाः शोभा निरन्तरा स्थास्यति।

अस्मिन् अवसरे राज्यपालस्य धर्मपत्नी बिन्दुगुप्ता, मेलासमितेः अध्यक्षः उपायुक्त-शिमला अनुपमकश्यपः, आरक्षि-अधीक्षकः गौरवसिंहः, एसजेवीएन- झाकड़ी- परियोजनाप्रमुखः राजीवकपूरः, उपमण्डलाधिकारी हर्ष अमरेन्द्रसिंहः, नगरपरिषद्-अध्यक्षः करणशर्मा, पूर्व-मण्डलपरिषद्- अध्यक्षा चन्द्रप्रभानेगी, खण्ड-काङ्ग्रेस- अध्यक्षः लालचन्दशर्मा, डीडी-कश्यपः सहिताः अन्येऽपि गण्यातिगण्याः (विशिष्टाः) जनाः उपस्थिताः आसन्।

गगने रोमाञ्चः, धरण्यां जीवनसङ्ग्रामः
बीड-बिलिङ्ग-क्षेत्रे मासाभ्यन्तरे चतुर्थी दुर्घटना, कदा विरंस्यन्ति एतादृशाः घटनाः?



हिमसंस्कृतवार्ताः- काङ्गड़ा।

हिमाचलप्रदेशस्य प्रख्याते पर्यटनस्थले बीड-बिलिङ्गक्षेत्रे 'पैराग्लाइडिङ्ग'-क्रीडायाः रोमाञ्चः पुनरेकवारं दुर्घटनायां परिवर्तितः। मङ्गलवासरे 'टैण्डम्- पैराग्लाइडिङ्ग'- उड्डयनकाले नोएडानगरस्य निवासी शुभम-नामा युवा प्रायः सार्धशत- मीटर (१५० मी.) परिमितोन्नतात् स्थानात् अधः अपतत्। निवेद्यते यद् इयं दुर्घटना 'बड़ी'-ग्रामस्य उपरिस्थिते अरण्यक्षेत्रे सञ्जाता। प्रारम्भावस्थायाम् आशङ्क्यते यत् तस्य पादयोः बन्धनपट्टिका स्खलिता उद्घातिता वा अभवत्। अनेन वृत्तान्तेन पुनरेकवारम् उड्डयनात् पूर्वं सुरक्षासाधनानां परीक्षणे नियमानां च परिपालने गम्भीराः प्रश्नाः उत्थापिताः।

मासाभ्यन्तरे चतुर्था 'पैराग्लाइडिङ्ग'-दुर्घटना

बीड-बिलिङ्ग-क्षेत्रे निरन्तरं जायमानाः दुर्घटनाः पर्यटकानां सुरक्षां प्रति चिन्तां वर्धयन्ति। मण्डले मासाभ्यन्तरे पैराग्लाइडिङ्ग-क्रीडया सम्बद्धा इयं चतुर्था दुर्घटना कथ्यते। इतः पूर्वमपि अत्र पर्यटैः चालकैः (पायलटजनैः) च सह दुर्घटनाः सञ्जाताः सन्ति। पुनः पुनः ईदृशानां घटनानां सम्भवेऽपि सुरक्षाव्यवस्थां प्रति प्रश्नानाम् उत्थापनं स्वाभाविकमेव वर्तते। इतः प्राक् २१ नवम्बर् २०२१ दिनाङ्के अपि सुरक्षापट्टिकायाः उद्घाटनात् एका दुर्घटना अभवत्। तस्मिन् वृत्तान्ते नगरोटा-बगवां- विधानसभाक्षेत्रस्य षड्विंशतिवर्षीयः (२६) सन्दीपचौधरी-नामा युवा कस्यचित् गृहस्य छदि पतित्वा दिवङ्गतः आसीत्। वर्तमानया घटनया तस्य दुःखदवृत्तस्य स्मृतयः पुनः सञ्जीविताः।

मण्डले पूर्वमपि सञ्जाताः बह्व्यः गम्भीराः दुर्घटनाः

काङ्गड़ा-मण्डले पैराग्लाइडिङ्ग-काले गतेषु वर्षेषु बह्व्यः दुर्घटनाः प्रकाशम् आगताः। एतासु पर्यटैः सहैव प्रशिक्षवः दक्षाः चालकाश्च अपि स्वप्राणान् अत्यजन्। २०१२ तमे वर्षे अमेरिका-देशस्य पञ्चसप्ततिवर्षीयः (७५) चालकः रान क्लाइट-महोदयः उत्तराला-पार्वत्यक्षेत्रेषु प्राणत्यागम् अकरोत्। २०१५ तमे वर्षे उज्बेकिस्तान-देशस्य चालकः अवतरणकाले (लैण्डिङ्ग-समये) दुर्घटनायां मृतः। अस्मिन्नेव वर्षे युनाइटेड-किङ्गडम- देशस्य एका महिला गगने स्वतन्त्रोड्डयनकाले (स्काई फ्री फ्लाइङ्ग) पतित्वा क्षतविक्षता जाता।

२०१६ तमे वर्षे धौलाधार-पर्वतमालासु ११ केवी विद्युत्तन्त्रिभिः सह संघर्षात् रूस-देशस्य चालकः पञ्चत्वं गतः। २०१८ तमे वर्षे सिङ्गापुर-देशस्य एकस्य चालकस्य अन्यस्य च पर्यटकस्य मरणप्रकरणानि प्रकाशम् आगतानि। २०२० तथा २०२१ वर्षयोरपि 'टैण्डम्' प्रशिक्षणोड्डयनयोः काले प्राणघातकाः दुर्घटनाः अभवन्। तदनन्तरं २०२३ तः २०२६ वर्षं यावदपि मण्डले पैराग्लाइडिङ्ग-दुर्घटनासु पर्यटकानां चालकानां च मरणस्य घटनाः पञ्जीकृताः सन्ति।

दुर्घटनाभ्यः परं सुरक्षोपकरणानां समीक्षा आवश्यकी

बीड-बिलिङ्ग-क्षेत्रे पैराग्लाइडिङ्ग-समये सुरक्षां विषयीकृत्य पूर्वमपि प्रश्नाः उत्थिताः। वर्तमानघटनायाः अनन्तरम् उड्डयनात् पूर्वं बन्धनपट्टिकायाः, रक्षकपट्टिकायाः, अन्येषां च साधनानां दृढपरीक्षणार्थं कठोरतायाः आवश्यकता अनुभूयते। दुर्घटनायाः कारणानां परीक्षणं विधास्यते, क्षेत्रे नियुक्तेभ्यः अधिकारिभ्यः अपि अस्य प्रकरणस्य सूचना ग्रहीष्यते।

काङ्गड़ामण्डलस्य पर्यटन- अधिकारिणः अनुसारेण बीड- बिलिङ्गक्षेत्रे पैराग्लाइडिङ्ग-क्रीडायै पर्यटकानां चालकानां च सुरक्षासम्बद्धाः नियमाः निर्धारिताः सन्ति। पर्यटनविभागे पञ्जीकृतैः चालकैः सहैव उड्डयनस्य अनुमतिः वर्तते। पर्यटकाः उड्डयनात् पूर्वं चालकस्य प्रमाणपत्रावलोकनस्य अधिकारमपि धारयन्ति।

पैराग्लाइडिङ्ग-काले एतेषां नियमानां परिपालनम् अनिवार्यम्

> 'टैण्डम्' उड्डयनाय पर्यटकस्य भारः सामान्यतया नवतेः विंशत्यधिकशतं (९० तः १२०) किलोग्रामं यावत् भवेत्। बालकानां कृते न्यूनातिन्यून-वयसः मार्गनिर्देशानामपि पालनम् अनिवार्यं वर्तते।

> एकेन चालकेन एकस्मिन् दिने अधिकाधिकं त्रीणि (३) 'टैण्डम्' उड्डयनानि कर्तुम् अनुमतिः दीयते।

> प्रचण्डवाते, दृष्टिसङ्कोचे (न्यूनदृश्यकतायां), वर्षाकाले, प्रतिकूल-ऋतौ वा उड्डयनं प्रतिषिद्धम् अस्ति।

> पैराग्लाइडिङ्ग-समयः सामान्यतया प्रातः अष्टवादनात् सायं षड्वादनपर्यन्तं भवति। एषः सूर्यास्तात् प्राक् ऋतोश्च स्थितिम् अवधाय निश्चीयते।

> उड्डयनात् पूर्वं हार्नेस, शिरस्त्राणम्, अन्यानि सुरक्षासाधनानि च सम्यक्तया धारणीयानि। उत्थाने (टेक-ऑफ) भूमौ अवतरणे (लैण्डिङ्ग) च विषमायाम् भूमौ विशेषसावधानी कर्तव्या।

> उड्डयनारम्भात् पूर्वं सर्वासां ग्रन्थीनां (बकल) सुरक्षापट्टिकानां च सम्यक् परीक्षणं करणीयम्।

बीड-बिलिङ्ग-क्षेत्रे पैराग्लाइडिङ्ग-रोमाञ्चाय देशविदेशेभ्यः पर्यटकाः समागच्छन्ति। ईदृशावस्थायां निरन्तरं जायमानाः दुर्घटनाः पर्यटनस्थलस्य ख्यातेः पर्यटकानां च सुरक्षायाः कृते गम्भीरचिन्तायाः विषयः अस्ति। साम्प्रतं प्रत्येकस्मात् उड्डयनात् पूर्वं सुरक्षासाधनानाम् अनिवार्यपरीक्षणं भवेत्, नियमानां च उल्लङ्घनकर्तृषु कठोरं कार्याचरणं विधातव्यम्।

शीतकालीन-अधिवेशनम्- चतुश्शताधिकानां (४००+) प्रश्नानां व्यूहे बद्धा भविष्यति सुक्खू- सर्वकारः; एतेषु विषयेषु भविष्यति महासङ्ग्रामः



हिमसंस्कृतवार्ताः- धर्मशाला। धर्मशालायां १६ नवम्बर-दिनाङ्कात् प्रारभ्यमाणे विधानसभायाः शीतकालीन-अधिवेशने अधुनावधि प्रतिपक्षस्य पक्षतः विधिव्यवस्थायाः (शान्ति-व्यवस्थायाः) तथा च सत्तापक्षस्य पक्षतः 'हिमाचल-हितानाम्' विषयाः प्रमुखाः दृश्यन्ते। यद्यपि काङ्ग्रेस-भाजपा-उभयोः दलयोः विधायकदले एकदिनात् पूर्वं रविवासरे धर्मशालायामेव स्वकीयकार्यनीतिं (रणनीतिं) निर्धारयिष्यतः। इतः पूर्वं १३ नवम्बरदिनाङ्के शिमलायां मन्त्रिमण्डलस्य (कैबिनेट-गोष्ठ्याः) उपवेशनम् अपि वर्तते। किन्तु यथा ऊना-नालागढ़-शिलाईक्षेत्रेषु हत्या-गुलिका-काण्डानि सञ्जातानि, तेन विधिव्यवस्था प्रतिपक्षाय सर्वाधिकं सुकरः विषयः संवृत्तः। परन्तु सत्तापक्षः इमं हिमाचल-हितानां सङ्ग्रामस्य विजयम् अधिकृत्य सदनस्य अन्तः अपि स्वकीयपक्षं करिष्यति। अयं विषयोऽपि उभयोः पक्षयोः मध्ये विवादस्य कारणं भविष्यति। शीतकालीन-अधिवेशनम् अस्मिन्नवसरे बहुभिः राजनैतिकैः जनहितसम्बद्धैश्च विषयैः उत्तप्तं (उष्णं) भवितुम् आशङ्क्यते। मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू- महोदयस्य नेतृत्वाधीनः काङ्ग्रेससर्वकारः यत्र स्वकार्यकालस्य उपलब्धीः, आर्थिक- आह्वानानि, हिमाचलस्य हितेभ्यः च केन्द्रसर्वकारेण सह प्रचलन्तं सङ्ग्रामं सदने प्राधान्येन उपस्थापयितुं शक्नोति, तत्रैव प्रतिपक्षत्वेन भाजपादलं सर्वकारं तस्य प्रतिज्ञासु, प्रशासनिकनिर्णयेषु, प्रदेशस्य च आर्थिकस्थितौ आवृणोतुं सज्जं स्थास्यति। कर्मचारिणां वरिष्ठतायाः, निवृत्तिवेतनस्य, महार्घता-वृत्तेः अवशिष्टराशेः (एरियर), नियुक्तिप्रक्रियायाश्च सम्बद्धाः विषयाः अपि उत्थास्यन्ति। अधिवेशनात् पूर्वं राज्यसर्वकारेण कर्मचारिणां वरिष्ठताम् अधिकृत्य अपि लिखिताः निर्देशाः निर्गमिताः। अतः कर्मचारिणाम् अधिकारेषु आपदुपशमे (आपदा- राहत- विषये) च अपि सङ्घर्षः भवितुं शक्नोति। भाजपा-दलस्य बहवः विधायकाः विशेषतया 'पीडीएनए' (PDNA) निधीम् अधिकृत्य आक्षेपान् कुर्वन्तः सन्ति। सीबीएसई- विद्यालयेषु शिक्षकाणां न्यूनता, आङ्ग्लभाषया सह विविधानां विषयाणां शिक्षकाणां नियुक्तये पृथक्- पृथक्-शैक्षणिकयोग्यतानां प्रकरणम् अपि सदने उत्थातुं शक्नोति।

सामान्यवर्ग- आयोगस्य सङ्गठनस्य याचना अपि राजनैतिकदृष्ट्या अतीव संवेदनशीलो विषयः वर्तते। मन्त्री विक्रमादित्यसिंहः अनिरुद्धसिंहश्च पूर्वमेव सामान्यवर्गाय आयोगस्य याचनायाः समर्थनं कृतवन्तौ स्तः। ईदृशावस्थायाम् इदं द्रष्टव्यं रोचकं भविष्यति यत् सर्वकारः अस्मिन् विषये सदने किं दृष्टिकोणं स्वीकरोति, भाजपा-दलं च कथम् इमं विषयम् उत्थापयति।

अधिवेशनार्थं समागताः चतुश्शताधिकाः (४००+) प्रश्नाः

विधानसभा-सचिवालये अस्मिन् अधिवेशने चतुश्शताधिकाः (४००+) प्रश्नाः, विंशत्यधिकाः (२०+) सूचनापत्राणि च सम्प्राप्तानि। एतेषु मार्ग-पेयजलापूर्ति- विद्युत्- सीबीएसई-विद्यालयेषु शिक्षकाणां न्यूनता- उद्योगानां स्थिति-पर्यटन-अनुद्योगिता- समानाः विषयाः समाविष्टाः सन्ति। अधिवेशने सोमवासरतः शनिवारपर्यन्तं सम्भूय षड् (६) उपवेशनानि भविष्यन्ति। एतेषु एकं दिनं वैयक्तिकसदस्यदिवसाय अपि निर्धारितम् अस्ति।

प्रदूषितनगरेभ्यः पर्वतप्रदेशेभ्यः गमनम्, शिमलायां वर्धितः सम्मर्दः

हिमसंस्कृतवार्ताः शिमला ।

समतलनगरेषु यदा वायोः गुणवत्ता चिन्तायाः विषयः भवितुम् आरभते, तदा पर्वतानां शान्ताः उपत्यकाः सुरम्यं च वातावरणं जनान् आत्मानं प्रति आकर्षयितुम् आरभन्ते। एतेषु दिनेषु तादृशमेव दृश्यं हिमाचलप्रदेशस्य राजधान्यां शिमलायां द्रष्टुं लभ्यते। नगरस्य मार्गेषु, मालरोड्-मार्गे प्रमुखेषु पर्यटनस्थलेषु पर्यटकानां सञ्चारः वर्धितुम् आरब्धः अस्ति। पर्यटकाः अत्र केवलं भ्रमितुम् एव न, अपितु दैनन्दिनस्य धावधावतायाः समतलक्षेत्राणां च प्रदूषिताद् वातावरणात् दूरं किञ्चित् शान्तिपलान् अनुभोक्तुम् अपि प्राप्नुवन्ति। शिमलायाः विशेषता अस्ति यत् अत्रत्यं वातावरणं सर्वेषु कालेषु पर्यटकेभ्यो भिन्नम् अनुभवं यच्छति। नवम्बर-मासे प्रातसायङ्कालस्य शीतलता, दिवा सुरम्यम् आतपं पर्वतानां मध्ये परिवर्तिनं प्राकृतिकं दृश्यं च पर्यटकान् आकर्षयति। एष एव हेतुः यत् अस्मिन् समये पर्यटनस्य उत्साहं केवलं शनिवार-रविवारयोः सीमितः न दृश्यते, अपितु सप्ताहस्य सामान्यदिनेषु अपि पर्यटकानां गमनागमनं प्रचलति।

सप्ताहस्य प्रतीक्षाम् अकृत्वा, सामान्यदिनेषु अपि प्राप्नुवन्तः पर्यटकाः

सामान्यतया शिमलायां पर्यटकानाम् सङ्ख्या सप्ताहान्ते अवकाशेषु च अधिका भवति। परम् अस्मिन् समये सप्ताहस्य अन्यदिनेषु अपि अतिथिगृहाणां-व्यापारस्य गतिविधयः दृश्यन्ते। उपलभ्यमानसूचनायाः अनुसारेण, नगरस्य अतिथिगृहेषु वर्धता ४० तः ५० प्रतिशतपर्यन्तं गच्छति।पर्यटनव्यापारस्य दृष्ट्या इयं स्थितिः महत्त्वपूर्णा अस्ति, यतः सामान्यदिनेषु अपि पर्यटकानाम् उपस्थितेः कारणेन अतिथिगृहाणां, भोजनशालासु, टैक्सी-चालकानां स्थानीयवणिक्कानां च कृते व्यापारस्य अवसरः प्राप्यते। पर्यटकानाम् आगमनेन नगरस्य प्रमुखेषु विपणिषु पर्यटनस्थलेषु च सञ्चारः दृश्यते।

प्रदूषणात् मुक्त्यावसरे पर्वतानाम् पलायनः

समतलक्षेत्रेषु वायुप्रदूषणस्य समस्यायाः मध्ये पर्वतीयक्षेत्राणां प्रति जनानाम् आकर्षणं वर्धनं स्वाभाविकम् अस्ति। शिमलासदृशानि पर्यटनस्थलानि प्राप्य सैलानिनः मुक्तवातावरणस्य, पर्वतीयदृश्यानाम् अपेक्षया च शान्तवातावरणस्य आनन्दम् प्राप्तुम् इच्छन्ति।

यद्यपि, शिमलां प्राप्नुवतां सर्वेषां पर्यटकानाम् आगमनस्य कारणं केवलं प्रदूषणात् सौख्यप्राप्तिः नास्ति। केचन जनाः परिवारेण सह अवकाशं यापयितुम्, केचन प्राकृतिकसौन्दर्यं द्रष्टुम्, केचन च दैनन्दिनस्य व्यस्तजीवनात् विरामं ग्रहीतुम् अत्र प्राप्नुवन्ति। परम् समतलक्षेत्राणां दूषितवायोः रक्षितुम् इच्छा अपि पर्यटनगतिविधीनां प्रभाविणं कारणं भवति।

वातावरणपरिवर्तने सति पर्यटकानां पूर्वानुमानोपरि दृष्टिः

शिमलायां वातावरणः सुरम्यः तिष्ठति, परम् आगमिषु दिनेषु प्रदेशस्य केषुचित् भागेषु वातावरणपरिवर्तनस्य सम्भावना अस्ति। वातावरणविज्ञानकेन्द्रस्य शिमलायाः ११ नवम्बर २०२६ दिनाङ्के प्रेषिते वार्तापत्रे, १२ तथा १३ नवम्बरदिनाङ्के प्रदेशस्य केषुचित् स्थानेषु लघुः मध्यमश्च वर्षा हिमपातः च भवितुम् अर्हति।

कुमारभास्करवर्म-संस्कृत-पुरातनाध्ययनविश्वविद्यालये चित्रांकणगुणवत्ता प्रदर्शनम्



हिमसंस्कृतवार्ता डॉ. निशिकान्तपाण्डेयः नलवारि,असमप्रदेशः

दीपावल्याः उपलक्ष्ये कुमारभास्करवर्म-संस्कृत-पुरातनाध्ययनविश्वविद्यालयस्य ललितकला-परिषदा (Fine Art Club) उद्यमेन, दृश्यकला-केन्द्रस्य (Centre for Visual Arts), आन्तरिक-गुणवत्ता-आश्वासन-प्रकोष्ठस्य (IQAC) छात्रपरिषदश्च सहयोगेन एका रङ्गवल्ली-प्रतियोगिता (Rangoli Competition) आयोजिता।अस्याः प्रतियोगितायाः माध्यमेन छात्राः स्वां सृजनात्मकप्रतिभाम्, कलाकौशलम्, वर्णानां सुन्दरं समन्वयं च प्रदर्शितवन्तः। ईदृशाः कार्यक्रमाः शिक्षार्थिषु सृजनशीलतायाः, सहकारस्य सांस्कृतिकचेतनायाश्च विकासे विशेषां भूमिकां निर्वहन्ति। अस्मिन् कार्यक्रमे उपस्थिताः आसन् कुलपतिः प्रो.प्रह्लाद.आर.जोशिवर्यः, प्रो.रञ्जिततिवारीवर्यः, प्रो.कलितावर्या च ।



शास्त्रिपदवीं प्राप्तवन्तः अभ्यर्थिनः सहाध्यापकपदे नियुक्त्यर्थम् आवेदनस्य अवसरं प्राप्स्यन्ति

स्नातकपदवीसमकक्षत्वेऽपि आवेदनप्रक्रियायाः बहिर्भूताः आसन् शास्त्रिपदवीधारिणः।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, प्रयागराजम्। उत्तरप्रदेशस्य अशासकीय-सहायताप्राप्तेषु माध्यमिकविद्यालयेषु प्रशिक्षित-स्नातकाध्यापकपदानां नियुक्त्यर्थम् आवेदनप्रक्रिया प्रचलति। अस्यां प्रक्रियायां सम्पूर्णानन्द-संस्कृतविश्वविद्यालयात् वाराणसीतः शास्त्रिपदवीं प्राप्तवन्तः अभ्यर्थिनः अपि आवेदनस्य अवसरं प्राप्तुं शक्नुवन्ति। वस्तुतः संस्कृतविषये शास्त्रिपदवी स्नातकपदव्याः समकक्षा अस्ति। तथापि प्रशिक्षित-स्नातक- अध्यापकपदानां कृते अर्हतां निर्धारयन् माध्यमिक- शिक्षाविभागः शास्त्रिपदवीधारिणः अभ्यर्थिनः आवेदनप्रक्रियायाः बहिः स्थापितवान् आसीत्। एतया विसङ्गत्या अभ्यर्थिषु असन्तोषः उत्पन्नः। अभ्यर्थिभिः स्वसमस्यां चयनायोगस्य समक्षं निवेदनपत्रद्वारा प्रस्तुतम्। तेषां निवेदनस्य आधारेण उत्तरप्रदेश- शिक्षासेवाचयनायोगेन शासनाय पत्रं प्रेषितम्। आयोगस्य उपसचिवः सञ्जयकुमारसिंहवर्यः अवदत् यत् शास्त्रिपदवीधारिणाम् अभ्यर्थिनां निवेदनं गम्भीरतया स्वीकृत्य शासनं प्रति पत्रं प्रेषितम् अस्ति। शासनादेशः प्राप्ते सति तेभ्यः अपि आवेदनस्य अवसरः प्रदास्यते।

चतुर्वर्षानन्तरं १७,७३५ पदानां कृते नियुक्तिप्रक्रिया

उत्तरप्रदेशस्य अशासकीयसहायताप्राप्तेषु माध्यमिकविद्यालयेषु प्रशिक्षितस्नातकाध्यापकानां १७,७३५ रिक्तपदानां कृते चतुर्वर्षानन्तरं नियुक्तिविज्ञापनं प्रकाशितम् अस्ति। अस्याः नियुक्तिप्रक्रियायाः अन्तर्गतं २०२६ तमवर्षस्य अक्टोबरमासस्य २४ दिनाङ्कात् आवेदनानि स्वीकृतानि सन्ति। आवेदनस्य अन्तिमतिथिः नवम्बरमासस्य २३ दिनाङ्कः निर्धारिता अस्ति। परीक्षायाः आयोजनं दिसम्बरमासस्य २३ तथा २४ दिनाङ्कयोः प्रस्तावितम् अस्ति।

पूर्वमपि शास्त्रिपदवीधारिभ्यः अवसरः प्रदत्तः आसीत्

उल्लेखनीयम् अस्ति यत् २०२२ तमे वर्षे आयोजितायां प्रशिक्षित- स्नातकाध्यापक-नियुक्तिप्रक्रियायाम् अपि शास्त्रिपदवीं प्राप्तवन्तः अभ्यर्थिनः आवेदनस्य अवसरं प्राप्तवन्तः आसन्। अतः वर्तमाननियुक्तिप्रक्रियायाम् अपि तेभ्यः समानः अवसरः प्रदातव्यः इति अभ्यर्थिनां मागः अस्ति।

'जय जय भैरवि असुरभयावनि...' इति स्तुतिगीतैः मुखरितं श्यामामाईमन्दिरम्

वैदिक-तान्त्रिकोक्तविधिना सम्पन्नः श्रीमद् १००८ महाकाली-पूजनमहोत्सवः, १९८४ तमवर्षादारभ्य प्रवर्ततेऽविच्छिन्ना परम्परा



बोकारो। इस्पातनगरीस्थस्य सेक्टर-२डी-क्षेत्रस्य मिथिलाचौकस्थिते पावने श्यामामाई-मैथिलीकालीमन्दिरे मैथिलीकलामञ्च-काली-पूजाट्रस्ट्-संस्थायाः तत्त्वावधाने आयोजितः द्विदिवसीयः श्रीमद् १००८ महाकाली-पूजनमहोत्सवः सोमवासरीयरात्रौ महाप्रसाद-वितरणेन सह पूर्णविधिविधानपूर्वकं, पारम्परिकानुष्ठानैः, अनन्यश्रद्धाभावेन च गरिमामये वातावरणे सम्पन्नतां प्राप्तवान्। अस्य आध्यात्मिकमहोत्सवस्योपलक्ष्ये सम्पूर्णं मन्दिर-प्राङ्गणं सजीवम् अलौकिकं च रूपं धारयता मनोहरालङ्कारेण विभूषितमासीत्। तेन समग्रं परिसरं भगवत्याः महाकाल्याः भक्तिरसेन परिपूर्णमिव दृश्यते स्म। द्विदिवसीयमहोत्सवस्य शुभारम्भः रविवासरे पूर्वाह्णे वैदिकमन्त्रघोषमध्ये पार्थिवशिवलिङ्गपूजया, वेदपाठेन, हनुमद्ध्वज-समर्पणेन च अभवत्। ततः पूर्वनिर्धारितसमयानुसारं रात्रौ दशवादनात् भगवत्याः कालिकायाः मुख्यपूजनम् वैदिकतान्त्रिकविधिना प्रारब्धम्। सोमवासरस्य प्रातःकाले उषसि महती आरती समायोजिता। तदनन्तरं समुपस्थितानां विपुलश्रद्धालुसमूहानां मध्ये महाभोगस्य महाप्रसादस्य च वितरणं सम्पन्नम्। तत्पश्चात् भगवत्याः श्यामायाः विशेषपूजनं विधाय द्विदिवसीयम् अनुष्ठानं समापितम्। एकत्र ढाकवाद्यस्य, ढोलवाद्यस्य, शहनाईवाद्यस्य च मङ्गलमधुरध्वनिभिः सह महाकाल्याः वैदिकमन्त्राः दिशो मुखरयन्ति स्म; अपरत्र मन्दिरपरिसरे प्रतिध्वनितैः भगवत्याः भक्तिगीतैः श्रद्धालवः भावविभोराः अभवन्। उल्लेखनीयमस्ति यत् अस्मिन् ऐतिहासिकमन्दिरे १९८४ तमवर्षादारभ्य अद्यावधि विशुद्धवैदिकरीत्या तान्त्रिकोक्तविधानेन च पूजनस्य अविच्छिन्ना परम्परा प्रवर्तमानास्ति।

बनिगामातः रसनचौक्यायाः मङ्गलनिनादेन शुभप्रवेशः, मिथिलातः समागतस्य गोविन्दस्य मधुरस्वरैः भक्तिरसस्य सञ्चारः

पूजनमहोत्सवस्य सांस्कृतिकनिशायाः शुभारम्भः बनिगामातः समागतानां कलाकाराणां पारम्परिकरसनचौक्यावादनस्य मङ्गलमधुरध्वनिना अभवत्। अस्मिन् वाद्यप्रस्तुतौ बिलटरामः, राजदेव रामः, जीबछ रामः, सुखित रामः, विश्वदेव रामः च स्वकीयया पारम्परिकवादनकलया समग्रं वातावरणं मङ्गलमयं चकारुः।

तदनन्तरं मञ्चे सङ्गीतसाधनायाः अद्भुतः प्रवाहः दृष्टः। मिथिलायाः पावनभूमेः विशेषतया आमन्त्रितः सुप्रसिद्धः गायकः गोविन्द झा मञ्चमारूढः सन् महाकवेः विद्यापतेः अमरवन्दनां 'जय जय भैरवि असुर भयावनि...' इति भक्तिपूर्णस्वरेण अगायत्। तेन सम्पूर्णं वातावरणं भक्तिरसेन परिपूर्णमभवत्। अनन्तरं सः एकस्मादपि श्रेष्ठतराणि भावपूर्णानि मैथिली-हिन्दीभाषयोः भगवतीवन्दनागीतानि प्रस्तुतवान्। तस्य मधुरगायनेन आकृष्टाः श्रद्धालवः अर्धरात्रिपर्यन्तं भक्तिभावेन ननृतुः।

भक्तिगीतैः युगलप्रस्तुतिभिश्च समाबद्धं सङ्गीतमयम् वातावरणम्

सांस्कृतिकसन्ध्यायां स्थानीयैः आमन्त्रितैश्च प्रतिष्ठितकलाकारैः शास्त्रीयसङ्गीतरागेषु निबद्धानां भक्तिगीतानां स्मरणीयाः प्रस्तुतयः प्रदत्ताः। गायिका करिश्मा प्रसादः 'माँ मेरी पत रखियो...' तथा 'सजा दो घर को गुलशन सा मेरे घर राम आए हैं...' इति भक्तिगीतानि मधुरस्वरेण प्रस्तुत्य उपस्थितान् सर्वान् श्रोतॄन् मन्त्रमुग्धान् अकरोत्। ततः अरुण पाठकः करिश्मा प्रसादश्च युगलरूपेण मिथिलायाः सांस्कृतिकगौरवस्य वर्णनं कुर्वन्तौ 'स्वर्ग सं सुंदर मिथिला धाम...' इति गीतं प्रस्तुतवन्तौ। तयोः प्रस्तुतिः श्रोतृभिः बहुधा प्रशंसिता। गायिका गौरी झा शास्त्रीयदुर्गारागे निबद्धं 'जय जय मां दुर्गे माता भवानी...' तथा भैरवीरागे निबद्धं 'भवानी दयानी...' इति गीतद्वयं भावपूर्णतया प्रस्तुतवती। दीप नारायण गोस्वामी जोगरागे 'काली काली महाकाली...' इति गीतस्य आलापं कृतवान्, यस्मिन् पण्डित बच्चन जी महाराजः तबलावाद्येन कुशलतया सङ्गतिम् अकरोत्। तदनन्तरं तेन प्रस्तुतस्य 'जय दुर्गे दुर्गति परिहारिणी...' इति भक्तिगीतस्य गानसमये हरेकनाथ गोस्वामी तबलावाद्यस्य लयतालैः श्रोतॄन् मुग्धान् अकरोत्। पण्डित श्याम गोस्वामी 'जगत जननी जगदंब भवानी...' तथा 'काली मैया के मंदिरिया सजि गेलै...' इति भक्तिगीतानि प्रस्तुत्य सम्पूर्णं पाण्डालं मातुः भक्तिरसे निमग्नमकरोत्। गायकः विश्वनाथ गोस्वामी 'चलो मन मां काली की ओर...' इति गीतं प्रस्तुतवान्, यस्मिन् युवा तबलावादकः ऋषि राज गोस्वामी सङ्गतिम् अकरोत्। तदनन्तरं पण्डित बच्चन महाराजस्य हरेकनाथ गोस्वामिनश्च युगलप्रस्तुतौ 'भवानी दयानी' इति गीतस्य समये ऋषि राज गोस्वामिनः तबलावादनस्य मधुरनिनादेन वातावरणस्य भव्यता वर्धिता। भक्तिगीतानां अस्याः सङ्गीतमयीधारायाः मध्ये सोनल दत्तायाः शिष्याभिः प्रस्तुतं भावनृत्यम् भक्तेः कलायाश्च अद्भुतं समन्वयं प्रदर्शितवत्। सङ्गीतमण्डल्यां राजेन्द्रः कीबोर्डवाद्येन, मनोजकुमारः ढोलकवाद्येन तथा हैण्डसोनिकवाद्येन, विधान दत्ता ऑक्टोपैडवाद्येन च मधुरसङ्गतिम् अकरोत्। सम्पूर्णस्य सांस्कृतिककार्यक्रमस्य सुरुचिपूर्णं सारगर्भितं च सञ्चालनं कमलेश मिश्रः स्वकीयेन विशिष्टशैल्या कृतवान्।

छठमहापर्वः प्रकृतेः प्रति कृतज्ञतायाः

लोकमङ्गलस्य च सनातनचेतनायाः उत्सवः- कुलपतिः



सम्पूर्णानन्द- संस्कृत- विश्वविद्यालयस्य, वाराणस्याः कुलपतिः प्रो. बिहारीलालशर्मा अवदत् यत् छठमहापर्वः भारतीयसंस्कृतौ प्रकृतेः प्रति कृतज्ञतायाः, समभावस्य लोकमङ्गलस्य च सनातनचेतनायाः महोत्सवः अस्ति। अस्ताचलगामिनः उदीयमानस्य च सूर्यस्य समानश्रद्धया उपासना भारतीयदर्शनस्य उदात्तं जीवनसन्देशम् अभिव्यञ्जयति। कुलपतिः अवदत् यत् छठमहापर्वः केवलं सूर्योपासनायाः धार्मिकः पर्व न, अपि तु वैदिकज्ञानस्य, आध्यात्मिक-साधनायाः, नारीशक्तेः, पर्यावरणसंरक्षणस्य सामाजिक- समरसतायाश्च अद्भुतः सङ्गमः अस्ति। भारतीयपरम्परायां सूर्यः जीवनस्य, ऊर्जायाः, ज्ञानस्य चेतनायाश्च प्रतीकरूपेण मन्यते। सूर्योपासनया व्यक्तिः बाह्यप्रकाशेन सह स्वान्तःकरणे विवेकस्य सद्बुद्धेश्च प्रकाशं जागरयितुं प्रेरणां प्राप्नोति। सः अवदत् यत् छठपर्वणः सर्वाधिकं विशिष्टं वैशिष्ट्यम् अस्ताचलगामिनः उदीयमानस्य च सूर्यस्य आराधना अस्ति। अस्तमानाय सूर्याय प्रदीयमानम् अर्घ्यं जीवने समभावस्य, विनम्रतायाः कृतज्ञतायाश्च सन्देशं ददाति, यदा तु उदीयमानः सूर्यः नवप्रभातस्य, आशायाः नूतनशक्तेश्च प्रतीकः अस्ति। एषा परम्परा जीवनस्य प्रत्येकस्मिन् परिस्थितौ सन्तुलनं सकारात्मकतां च धारयितुं प्रेरणां ददाति।

प्रो. शर्मणा चतुर्दिवसीयस्य पर्वणः विविधान् अनुष्ठानान् पवित्रतायाः, तपस्यायाः, सङ्कल्पस्य आत्मानुशासनस्य च साधनरूपेण वर्णयित्वा उक्तं यत् व्रतिनीनां त्यागः आत्मसंयमश्च भारतीयनारीशक्तेः आध्यात्मिकसामर्थ्यस्य प्रेरणादायकम् उदाहरणम् अस्ति। छठपर्व कुटुम्बं समाजं च श्रद्धायाः, सहयोगस्य आत्मीयतायाश्च सूत्रेण संयोजयति। पर्यावरणसंरक्षणस्य सन्दर्भे सः अवदत् यत् सूर्यस्य, जलस्य, पृथिव्याः, वनस्पतीनां, फलानां धान्यस्य च प्रति श्रद्धा मानवजीवनस्य प्रकृतौ निर्भरत्वस्य बोधं कारयति। वर्तमानसमये जलवायुपरिवर्तनं, जलसङ्कटं प्रदूषणं च इत्यादीनां स्थितीनां मध्ये छठपर्वणः प्रकृतिकेन्द्रिता चेतना विशेषरूपेण प्रासङ्गिकी अस्ति। नदीनां, सरोवराणां जलाशयानां च स्वच्छता तथा पर्यावरणानुकूलस्य आयोजनस्य स्वीकारः सामाजिकदायित्वत्वेन करणीयः।

कुलपतिवर्यः अवदत् यत् छठमहापर्वः व्यक्तेः आत्मानुशासनं, कुटुम्बस्य मङ्गलं, सामाजिक-समरसतां प्रकृतेः प्रति उत्तरदायित्वं च एकसूत्रे संयोजयति। 'सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः' इति भावनायां निहितः लोककल्याणस्य सन्देश एव अस्य पर्वणः व्यापकसांस्कृतिकचेतना अस्ति।

भगिन्याः भ्रातुः च सम्बन्धः प्रेम्णः, स्नेहस्य, विश्वासस्य च पवित्रः प्रतीकः- सुषमामिश्रा



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्। केन्द्रीयब्राह्मणमहासभायाः जनपदाध्यक्षा सुषमामिश्रा भ्रातृद्वितीयायाः पावनपर्वणि जनपदस्य समस्तेभ्यः भ्रातृभ्यः भगिनीभ्यश्च हार्दिक्यः शुभकामनाः प्रेषितवती। अस्मिन् पावनपर्वणि भगिन्यः स्वभ्रातृणां दीर्घायुषः, उत्तमस्वास्थ्यस्य, सुखसमृद्धेश्च कामनां कुर्वन्ति। भ्रातृभगिन्योः सम्बन्धः अत्यन्तं पवित्रः, स्नेहपूर्णः, विश्वासयुक्तश्च भवति। प्रत्येकं भगिनी स्वभ्रातुः दीर्घायुः, सुखं, समृद्धिं च कामयते। भ्रातरः अपि स्वभगिनीनां सम्मानस्य, सुरक्षायाः, सुखस्य च सङ्कल्पं कुर्वन्ति। सुषमामिश्रा उक्तवती यत् भ्रातृद्वितीयायाः पर्व केवलं धार्मिकः उत्सवः नास्ति, अपि तु भ्रातृभगिन्योः मध्ये विद्यमानस्य अटूटप्रेम्णः, आत्मीयतायाः, पवित्रसम्बन्धस्य च प्रतीकम् अस्ति। अस्माकं सर्वेषां मध्ये एषः स्नेहः, प्रेम, परस्परविश्वासश्च सदैव अक्षुण्णः तिष्ठतु। इति कामयमाना सा पुनः समस्तसिद्धार्थनगरवासिभ्यः भ्रातृद्वितीयापर्वणः हार्दिक्यः शुभकामनाः प्रदत्तवती।

२००४ तमे वर्षे अधिगृहीतायाः भूमेः २०१४ पर्यन्तम् अधिनिर्णयः न कृतः चेत् नवीननियमानुसारं प्रतिकरः देयः

हिमसंस्कृतवार्ताः- प्रयागराजम्। इलाहाबाद-उच्चन्यायालयेन स्पष्टं कृतं यत् २००४ तमे वर्षे अधिगृहीतायाः भूमेः कृते यदि २०१४ तमवर्षस्य जनवरीमासपर्यन्तं प्रतिकरनिर्धारणस्य अधिनिर्णयः न कृतः, तर्हि नवीनभूम्यधिग्रहणविधेः नियमानुसारं प्रतिकरस्य निर्धारणं भविष्यति। न्यायालयेन राज्यसर्वकाराय निर्देशः प्रदत्तः यत् निर्धारितसमयसीमायाम् अपूरणस्य (प्रतिकरस्य) भुगतानं सुनिश्चितं करोतु। अयं निर्णयः न्यायमूर्तिभ्यां सिद्धार्थवर्मणा तथा कपालकृष्णमिश्रेण च प्रदत्तः। सहारनपुरनिवासी दिलशाद अली तथा अन्ये च याचिकां प्रस्तुतवन्तः आसन्। तेषां भूमिः सहारनपुरजनपदस्य मावीखुर्दग्रामे स्थिता अस्ति। तस्याः भूमेः अधिग्रहणं कर्तुं जून्-मासे २००४ तमे वर्षे उत्तरप्रदेश- आवासविकासपरिषदः अधिनियमस्य अष्टाविंशतितमधारायाः अन्तर्गतं अधिसूचना निर्गता आसीत्। न्यायालयेन निर्देशः प्रदत्तः यत् भूम्यधिग्रहणस्य प्रतिकरः नवीनविधेः प्रावधानानुसारं निर्धारितः करणीयः तथा च याचिकाकर्तृभ्यः नियमानुसारं प्रतिकरराशिः प्रदातव्या।

कार्तिकपूर्णिमायाः पावनावसरे गढमुक्तेश्वर- गङ्गास्नानमेला- तिग्रीमेलायाश्च सज्जतायाः मुख्यमन्त्रिणा समीक्षा कृता

श्रद्धायाः, अनुशासनस्य, स्वच्छतायाश्च प्रतीकः भविष्यति पश्चिमोत्तरप्रदेशस्य लघुकुम्भः- योगी आदित्यनाथः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। उत्तरप्रदेशस्य माननीयः मुख्यमन्त्री योगी आदित्यनाथः कार्तिकपूर्णिमायाः पावनावसरे नवम्बरमासस्य १७ दिनाङ्कात् २६ दिनाङ्कपर्यन्तम् आयोज्यमानस्य गढमुक्तेश्वरगङ्गास्नानमेलायाः तिग्रीमेलायाश्च सज्जतासम्बद्धाम् उच्चस्तरीयां समीक्षां लखनऊमहानगरे अद्य कृतवान्।

मुख्यमन्त्रिणा उक्तं यत् पश्चिमोत्तरप्रदेशस्य लघुकुम्भरूपेण प्रसिद्धः अयं मेला श्रद्धायाः, अनुशासनस्य, स्वच्छतायाश्च आदर्शः भवेत्। श्रद्धालूनां सुरक्षायै, सुगमाय यातायातव्यवस्थायै, स्वच्छतायै च आरक्षिविभागस्य प्रशासनस्य च अधिकारिभिः सुदृढाः व्यवस्थाः सुनिश्चिताः करणीयाः। सर्वाः सज्जताः निर्धारितसमये एव पूर्णाः करणीयाः। मुख्यमन्त्रिणा गृहविभागस्य, लोकनिर्माणविभागस्य, परिवहनविभागस्य, सिञ्चन-विभागस्य, नगरविकासविभागस्य, ऊर्जाविभागस्य, पञ्चायतीराजविभागस्य, स्वास्थ्यविभागस्य च सम्बन्धिताधिकारिभ्यः मेलारम्भात् पूर्वमेव सर्वासां व्यवस्थाणाम् निरीक्षणं कर्तुं निर्देशाः प्रदत्ताः। परिवहनविभागाय श्रद्धालूनाम् आवागमनस्य सुविधां दृष्ट्वा अतिरिक्तयानानां व्यवस्था सुनिश्चितां कर्तुं विशेषनिर्देशः प्रदत्तः। मुख्यमन्त्रिणा पुनः स्पष्टं कृतं यत् मेलायाम् आगच्छतां सर्वेषां श्रद्धालूनां कृते सुरक्षितं, सुगमं, सुव्यवस्थितं च वातावरणं निर्मातव्यम्। प्रशासनस्य सर्वैः विभागैः परस्परं समन्वयं स्थापयित्वा मेलायाः सर्वाः व्यवस्थाः सुचारुरूपेण सम्पादनीयाः।



श्रीकोसलेशभगवते ३२७ प्रकारकाणां व्यञ्जनानां भोगः समर्पितः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, अयोध्या। श्रीरामजन्मभूमिमन्दिरस्य जगद्गुरुरामानुजाचार्यद्वारे स्थिते श्रीकोसलेशसदनमन्दिरे भक्तिभावपूर्णं धार्मिकम् आयोजनम् अभवत्। अस्मिन् पावनावसरे जगद्गुरुरामानुजाचार्यः पूज्यः स्वामी वासुदेवाचार्यः विद्याभास्करजीमहाराजः स्वकीयाभ्यां करकमलाभ्यां श्रीकोसलेशभगवते ३२७ प्रकारकाणां विविधव्यञ्जनानां भोगं भक्तिपूर्वकं समर्पितवान्। अस्मिन् विशिष्टे धार्मिके आयोजने भगवतः श्रीकोसलेशस्य दिव्यपूजया तथा नैवेद्यसमर्पणेन सम्पूर्णं मन्दिरपरिसरं भक्तिमयम् अभवत्। भक्ताः भगवतः दर्शनं कृत्वा आध्यात्मिकम् आनन्दम् अनुभूतवन्तः।

संविधानसदने भारतीयपुलिससेवायाः नवप्रशिक्षिताधिकारिभिः सह संवादः।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, नवदेहली। संविधानसदनस्य केन्द्रीयसभागारे संसदीयाध्ययनभ्रमणार्थम् आगतैः भारतीय-पुलिससेवायाः (IPS) अष्टसप्ततितमे आर. आर. समूहे (२०२५ तमे वर्षे नियुक्ते) अन्तर्भूतैः अधिकारिभिः सह संवादः कृतः।

भारतस्य संसद् तथा संसदीयव्यवस्था अस्माकं लोकतन्त्रस्य गौरवशालिन्यौ परिचायकौ स्तः। संविधानं विधायिकायाः, कार्यपालिकायाः, न्यायपालिकायाः च दायित्वानि निर्धारित्य न्याय-समानता- भ्रातृत्वमूल्याधारितस्य शासनतन्त्रस्य मार्गदर्शनं करोति।

विधानानां नीतिनिर्णयानाञ्च वास्तविकं महत्त्वं तेषाम् प्रभाविणि कार्यान्वयने एव निहितम् अस्ति। अस्य महत्त्वपूर्णं दायित्वं प्रशासनिकानां पुलिसाधिकारिणाञ्च उपरि वर्तते। युवा-अधिकारिभ्यः अपेक्ष्यते यत् ते संवेदनशीलतया, निष्पक्षतया तथा जनसेवाभावनया स्वदायित्वानां निर्वहणं कुर्युः। विधेः उद्देश्यं केवलं व्यवस्थायाः संरक्षणं नास्ति, अपितु प्रत्येकस्य नागरिकस्य अधिकाराणां गरिमायाश्च रक्षणम् अपि अस्ति। समाजस्य अन्तिमस्थितेभ्यः जनसामान्येभ्यः न्यायस्य सुरक्षायाश्च विश्वासं प्रापयितुम् एव लोकसेवायाः वास्तविकं मानदण्डम् अस्ति। पुलिससेवायां महिलानां वर्धमाना सहभागिता अपि सकारात्मकः परिवर्तनः अस्ति। विश्वासः अस्ति यत् एते युवा-अधिकारिणः स्वकीयया निष्ठया, कार्यदक्षतया तथा मानवीयदृष्टिकोणेन राष्ट्रस्य सेवां कुर्वन्तः सुशासनं लोकतान्त्रिकमूल्यानि च अधिकं सुदृढं करिष्यन्ति। लोकसेवा एव राष्ट्रसेवा, न्याय-सुरक्षा-समानता च सुदृढलोकतन्त्रस्य आधारस्तम्भाः सन्ति।

अयोध्यायां दीपोत्सव-२०२६ अवसरे २२० टन परिमितया सिकतया निर्मितः भव्यः श्रीरामदरबारः विश्वकीर्ति-मानपुस्तिकायां समङ्कितः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः अयोध्या। उत्तरप्रदेशस्य योगीशासनस्य संरक्षणे आयोजिते दीपोत्सव-२०२६ महोत्सवे अन्तर्राष्ट्रीय- ख्यातिप्राप्तेन सिकताशिल्पिणा मधुरेन्द्रकुमारेण सरयूनद्याः २२० टन-परिमितायाः सिकतायाः उपयोगेन भव्यं श्रीरामदरबारस्य, श्रीराममन्दिरस्य च विशालं कलात्मकं प्रतिरूपं निर्मितम्।

अस्याः अद्भुतकलाकृतेः विस्तारः ५८ पादपरिमितः, उन्नतिः च २० पादपरिमिता आसीत्। अस्याः निर्माणकार्यं अक्तूबरमासस्य त्रिंशत्तमदिनाङ्के प्रारब्धम्। अनवरतं सप्तदिनानि परिश्रमं कृत्वा नवम्बरमासस्य सप्तमदिनाङ्के कलाकारः निर्माणकार्यं सफलतया सम्पूर्णवान्। एषा अद्वितीया सिकताशिल्पकला 'बुक ऑफ वर्ल्ड् रेकॉर्ड्स' इति विश्वकीर्तिमानपुस्तिकायां स्थानं प्राप्तवती। अस्याः कृते डिजिटलप्रमाणपत्रम् अपि प्रदत्तम्।

अवसरेऽस्मिन् भारतस्य उपराष्ट्रपतिना सी. पी. राधाकृष्णनेन, उत्तरप्रदेशस्य राज्यपालया श्रीमत्या आनन्दीबेन पटेलेन, मुख्यमन्त्रिणा श्रीयोगी आदित्यनाथेन च अस्याः भव्यकलाकृतेः अवलोकनं कृतम्। सर्वैः कलाकारस्य अद्भुतप्रतिभायाः मुक्तकण्ठेन प्रशंसा कृता। उपराष्ट्रपतिना 'वेल डन' इति उक्त्वा कलाकारस्य उत्साहवर्धनम् अपि कृतम्। कलाकारस्य मधुरेन्द्रकुमारस्य जीवनस्य एषा प्रथमा तथा विश्वस्य दीर्घतमा सिकतानिर्मिता श्रीरामदरबार- कलाकृतिः अस्ति। अस्याः कलाकृतेः गिनीज विश्वकीर्तिमानपुस्तिकायां पञ्जीकरणाय प्रक्रिया अपि प्रचलति। बिहारराज्यस्य पूर्वीचम्पारणजनपदस्य निवासी मधुरेन्द्रकुमारः पञ्चविंशत्यधिकेषु देशेषु भारतस्य प्रतिनिधित्वं कृत्वा राष्ट्रस्य गौरवं वर्धितवान्। तेन द्वादशाधिकाः विश्वकीर्तिमानाः अपि स्थापिताः सन्ति। अस्य अद्भुतसिकताशिल्पस्य माध्यमेन भारतीयसंस्कृतेः, श्रीरामभक्तेः, कलात्मकप्रतिभायाः च वैश्विकस्तरे गौरववर्धनं जातम्।

अंशविपणिसमाचारः

भारतीयांशविपण्यां प्रचण्डा वृद्धिः, सेन्सेक्सनिफ्टीसूचकाङ्क्योः हरितचिह्ने समापनम्

हिमसंस्कृतवार्ताः- डॉ. विमलेशझा, मुंबई, ११ नवम्बर २०२६। २०२६ तमस्य वर्षस्य नवम्बरमासस्य एकादशे दिनाङ्के भारतीयांविपण्याम् उत्साहपूर्णं वातावरणं दृष्टम्। प्रारम्भिकव्यवसाये विपण्यां प्रचण्डा वृद्धिः अभवत्। दिनस्य व्यवसाये उन्नतावनती दृष्टवन्तौ, तथापि अन्ते प्रमुखाः सूचकाङ्काः हरितचिह्ने एव व्यवसायं समापितवन्तः। बीएसई- सेन्सेक्स- सूचकाङ्कः ७७२.७५ अङ्कैः (०.९५ प्रतिशतं) वर्धित्वा ८१,८७९.४० इति स्तरं प्राप्तवान्। तथैव एनएसई- निफ्टी- ५०-सूचकाङ्कः २१०.४० अङ्कैः (०.८४ प्रतिशतं) वर्धित्वा २५,२५५.०५ इति स्तरं प्राप्तवान्। प्रातःकालीनव्यवसायकाले सेन्सेक्स- सूचकाङ्कः एकस्मिन् समये १,३२६ अङ्काधिकां वृद्धिं प्राप्य ८२,४३२ इति स्तरमपि अतिक्रान्तवान्। अद्य महिन्द्रा एण्ड महिन्द्रा, इण्डिगो, ट्रेण्ट, टाटा स्टील, आईटीसी, एक्सिस्बैङ्क, मारुतिसुजुकी, भारतीएयरटेल इत्येतेषां प्रमुखसंयन्त्राणां समभागेषु पर्याप्ता वृद्धिः अभवत्। अपरपक्षे अदाणीपोर्ट्स, टेकमहिन्द्रा, एचसीएलटेक इत्येतेषां समभागेषु मूल्यह्रासः अभवत्। अद्य वाहननिर्माणक्षेत्रे (ऑटो), बैंकिङ्गक्षेत्रे, सार्वजनिकक्षेत्रस्य उपक्रमेषु (पीएसयू) तथा उपभोक्तृवस्तुक्षेत्रे (एफएमसीजी) विशेषा वृद्धिः दृष्टा। एतेषां क्षेत्राणां समभागैः भारतीयांशविपण्याः वृद्धौ महत्त्वपूर्णं योगदानं कृतम्। समग्रतया अद्यतनं भारतीयांशविपणि निवेशकानां कृते उत्साहवर्धकं सिद्धम् अभवत्। प्रारम्भिकवृद्धेः अनन्तरमपि विपण्यां सकारात्मकता अवशिष्टा आसीत्। सेन्सेक्स-निफ्टी-सूचकाङ्क्योः लाभेन निवेशकानां मनसि आशावादः वर्धितः। वाहन, वित्तकोशः, सार्वजनिकोपक्रम, उपभोक्तृवस्तुक्षेत्राणां च सुदृढप्रदर्शनेन विपण्याः समग्रस्थितिः सुदृढा अभवत्।

माता-पितृनाम्नो वर्णविन्याससंशोधनाय त्रिवर्षीयः कालावरोधः नास्ति

हिमसंस्कृतवार्ताःवृजेश कुमार पाण्डेय

प्रयागराजम्। इलाहाबाद-उच्चन्यायालयेन महत्त्वपूर्णे निर्णये स्पष्टं प्रतिपादितं यत् उच्चविद्यालयस्य मध्यवर्तीशिक्षायाश्च अङ्कपत्रेषु प्रमाणपत्रेषु च मातापित्रोः नाम्नो वर्णविन्याससम्बद्धदोषाणां संशोधनार्थं त्रिवर्षीयः कालावरोधः न भविष्यति। एतादृशानां त्रुटीनां संशोधनार्थं निर्धारितायां त्रिवर्षीयायां समयसीमायां आवेदनं कर्तव्यमिति अनिवार्यं नास्ति।न्यायालयेन सम्बन्धितप्राधिकरणाय निर्देशः प्रदत्तः यत् याचिकाकर्तुः मातुः नाम्नि विद्यमानं वर्णविन्यासदोषं संशोध्य एकमासस्य अन्तर्गतं संशोधिताभिलेखः निर्गमनीयः।अयं निर्णयः न्यायमूर्तिना सिद्धार्थनन्दनेन नाहिदाबी इत्यस्याः याचिकायाः श्रवणानन्तरं प्रदत्तः।रामपुरनिवासिनी याचिकाकर्त्री स्वस्य शैक्षणिकाभिलेखेषु मातुः नाम्नः स्थाने 'खैरुन्निशा' इत्यस्य स्थाने 'मेहरुल्निशा' इति संशोधनं कारयितुम् इच्छति स्म। अस्याः सम्बन्धे सा न्यायालये याचिकां प्रस्तुतवती आसीत्।

हृदयरोगः, हृदयाघातश्च- अलाब्वाः रसस्य सेवनविषये प्रचलितानां आक्षेपानां वैज्ञानिकं परीक्षणम्



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः

भारतीयायाम् आयुर्वेदपरम्परायां महर्षेः वाग्भटस्य महत्त्वपूर्णं स्थानम् अस्ति। तेन विरचिते 'अष्टाङ्गहृदये' आयुर्वेदस्य विविधाः सिद्धान्ताः, रोगाणां लक्षणानि, तेषां चिकित्सापद्धतयश्च विस्तरेण वर्णिताः सन्ति।

सम्प्रति जनसञ्चारमाध्यमेषु हृदयाघातस्य कारणं रक्तस्य अम्लता इति, अलाब्वाः रसस्य नियमितसेवनेन हृदयस्य रक्तवाहिनीनां अवरोधः निवारयितुं शक्यते इति च प्रचारः प्रचलति। अस्मिन् प्रचारे अलाब्वाः रसस्य तुलसीपत्रैः, पुदीनापत्रैः, कृष्णलवणेन वा सैन्धवलवणेन सह सेवनस्य परामर्शः अपि दीयते।

परन्तु एतादृशानां आक्षेपानां समर्थनार्थं पर्याप्तं वैज्ञानिकं प्रमाणं नास्ति। हृदयाघातस्य प्रमुखं कारणं हृदयस्य रक्तवाहिनीनाम् अन्तः वसामयपदार्थानां सञ्चयेन संकुचनं, रक्तस्य स्कन्दनम् अथवा रक्तप्रवाहस्य अवरोधः भवितुम् अर्हति। रक्तस्य अम्लतावृद्धिरेव हृदयाघातस्य एकमात्रं कारणम् इति कथनं चिकित्साविज्ञानसम्मतं नास्ति। अतः अलाब्वाः रसस्य सेवनमात्रेण हृदयस्य रक्तवाहिन्यः अवरोधमुक्ताः भवन्ति, शल्यचिकित्सायाः आवश्यकता न भवति अथवा एकविंशतिदिनेषु रोगः निवार्यते इति आक्षेपाः अप्रमाणिताः सन्ति।

चिकित्सकीयः परामर्शः-

हृदयरोगिणः चिकित्सकस्य परामर्शानुसारमेव औषधानि सेवन्तु। अलाब्वाः रसः हृदयरोगस्य प्रमाणितचिकित्सायाः विकल्पः नास्ति। विशेषतः कटुतिक्तस्वादयुक्तायाः अलाब्वायाः रसस्य सेवनं विषाक्ततां जनयितुं शक्नोति। वक्षसि तीव्रवेदना, श्वासकष्टम्, स्वेदः अथवा मूर्च्छासदृशलक्षणानि उत्पद्यन्ते चेत् तत्कालं चिकित्सकीयसाहाय्यं प्राप्नुयात्।

जनहिताय सन्देशः- आयुर्वेदस्य सम्मानं कुर्वन्तु, किन्तु अप्रमाणितचिकित्सकीयदावेषु विश्वासं कृत्वा जीवनस्य अमूल्यं स्वास्थ्यं संकटे मा पातयन्तु। आरोग्यरक्षणाय सन्तुलिताहारः, नियमितव्यायामः, धूम्रपानस्य परित्यागः तथा समये समये स्वास्थ्यपरीक्षणं महत्त्वपूर्णानि सन्ति।

भ्रातृद्वितीयायाः पुण्यावसरे त्रिदण्डि- आयुर्वेद- महाविद्यालयस्य चिकित्सालयस्य च नूतन- भवनस्य शिलान्यासः सम्पन्नः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, गयाजी (बिहारम्)। भ्रातृद्वितीयायाः पावनपर्वणि अद्य बिहारप्रदेशस्य गयाजीजनपदे करजरायां स्थितस्य स्वामी राघवेन्द्राचार्य- त्रिदण्डि- आयुर्वेद- महाविद्यालयस्य चिकित्सालयस्य च नूतनभवनस्य शिलान्यासः धार्मिकविधिविधानपूर्वकं सम्पन्नः।

अस्य नूतनभवनस्य शिलान्यासः बक्सरस्य आरा-नगरस्य च बड़कीमठस्य पूज्यपादैः श्रीमहन्तैः जगद्गुरु-रामानुजाचार्य-स्वामि-अयोध्यानाथ-स्वामिभिः महाराजैः स्वकरकमलाभ्यां विधिवत् सम्पन्नः।अस्मिन् पावने शुभावसरे हरिद्वारतः समागतानां पूज्यपादानां जगद्गुरु- रामानुजाचार्य-स्वामि- वैकुण्ठनाथ- स्वामिनां महाराजानां गरिमामयी पावनसन्निधिरपि समुपस्थिता आसीत्।

अयं शिलान्याससमारोहः आयुर्वेदचिकित्सायाः, संस्कृतिपरम्परायाः तथा लोककल्याणस्य दृष्ट्या महत्त्वपूर्णः अवसरः अभवत्। अस्य नूतनभवनस्य निर्माणेन आयुर्वेदशिक्षायाः चिकित्सासेवायाश्च विकासाय नूतनः मार्गः प्रशस्तः भविष्यति इति आशा व्यक्ता।

नवचयनितकनिष्ठसहायकेभ्यः नियुक्तिपत्राणि वितीर्णानि, कृषकदुर्घटनाकल्याणयोजनायाः ४३०० लाभार्थिभ्यः २१५ कोटिरूप्यकाणां साहाय्यराशिः प्रदत्ता



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ, उत्तरप्रदेशः। लखनऊमहानगरे उत्तरप्रदेशस्य यशस्विनः मुख्यमन्त्रिणः योगी आदित्यनाथमहोदयस्य गरिमामय्याः उपस्थितौ भव्यः कार्यक्रमः समायोजितः। अस्मिन् कार्यक्रमे उत्तरप्रदेश- अधीनस्थ- सेवाचयनायोगेन राजस्वविभागाय नवचयनितेभ्यः ११४६ कनिष्ठसहायकेभ्यः नियुक्तिपत्राणि वितीर्णानि। तथैव मुख्यमन्त्री कृषकदुर्घटना-कल्याणयोजनायाः अन्तर्गतं ४३०० लाभार्थिभ्यः २१५ कोटिरूप्यकाणाम् आर्थिकसाहाय्यराशिः वितरिता।

कार्यक्रमं सम्बोधयन् माननीयः मुख्यमन्त्री नवचयनितेभ्यः कनिष्ठसहायकेभ्यः हार्दिकम् अभिनन्दनं कृतवान्, तेषाम् उज्ज्वलभविष्याय शुभकामनाः प्रदत्तवान्। सः अवदत् यत् उत्तरप्रदेशसर्वकारः पारदर्शिन्याः नियुक्तिप्रक्रियायाः माध्यमेन युवभ्यः रोजगारस्य अवसरान् प्रदातुं, तेषाम् उज्ज्वलभविष्यस्य निर्माणं कर्तुं, कृषकाणां साहाय्यं सम्मानं च सुनिश्चितं कर्तुं दृढसङ्कल्पितः अस्ति।

अस्मिन् अवसरे उत्तरप्रदेशसर्वकारस्य माननीयः राज्यमन्त्री सुरेन्द्रदिलेरमहोदयः, विधानपरिषदः माननीयौ सदस्यौ लालजीप्रसादनिर्मलमहोदयः, रामचन्द्रप्रधानमहोदयः, माननीयः विधायकः नीरजबोरामहोदयः, राजस्वपरिषदः अध्यक्षः बी. एल. मीणामहोदयः, राजस्वविभागस्य प्रमुखसचिवा अपर्णा यू. महोदया, राजस्वपरिषदः आयुक्ता एवं सचिवा कञ्चनवर्मामहोदया च अन्ये च गणमान्याः अतिथयः उपस्थिताः आसन्।अयं कार्यक्रमः उत्तरप्रदेशसर्वकारस्य युवकल्याणाय, रोजगारसृजनाय, कृषकहितसंरक्षणाय, सामाजिकसुरक्षायै कृतानां प्रतिबद्धप्रयत्नानां च महत्त्वपूर्णं प्रतीकम् अस्ति।

क्रीडाङ्गणे विद्यार्थिनां शौर्यप्रदर्शनम्,

प्रतिभाशालिभिः छात्रैः विद्यालयानां गौरवं वर्धितम्

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, उन्नावम्। उत्तरप्रदेशस्य उन्नावजनपदस्य औरासविकास-खण्डान्तर्गते रामपुरगढौवा- न्यायपञ्चायतक्षेत्रे न्यायपञ्चायतस्तरीयायाः क्रीडाप्रतियोगितायाः आयोजनम् अभवत्। अस्यां प्रतियोगितायां विभिन्नविद्यालयेभ्यः समागताः छात्राः उत्साहपूर्वकं भागं गृहीत्वा स्वकीयानां क्रीडाकौशलानां उत्कृष्टं प्रदर्शनम् अकुर्वन्। अस्मिन् अवसरे रामपुरगढौवा-विद्यालयस्य छात्रः समीरः विजेतृचैम्पियनशिपं प्राप्य विद्यालयस्य गौरवम् अवर्धयत्। तत्रैव विद्यालयस्य एका छात्रा अपि चैम्पियनशिपं विजित्य विद्यालयस्य मानं वर्धितवती। औरासखण्डस्य खण्डशिक्षाधिकारी दीपेशकुमारमहोदयः समीराय स्वर्णपदकं प्रदाय तस्य सम्मानम् अकरोत्। क्रीडाप्रतियोगिताः छात्रेषु अनुशासनस्य, आत्मविश्वासस्य, सामूहिकभावनायाः, स्वस्थप्रतिस्पर्धायाः भावनायाः च विकासं कुर्वन्ति। एताः प्रतियोगिताः विद्यार्थिनां अन्तर्निहितप्रतिभानां परिष्काराय अपि महत्त्वपूर्णं माध्यमं भवन्ति। उत्तरप्रदेशस्य आधारभूत- शिक्षाविभागः विद्यार्थिनां शारीरिक- मानसिक- विकासाय, क्रीडाप्रतिभानां संवर्धनाय, क्रीडासंस्कृतेः च प्रोत्साहनाय पूर्णनिष्ठया निरन्तरं प्रयत्नशीलः अस्ति। क्रीडया स्वास्थ्यं, प्रतिस्पर्धया आत्मविश्वासः, विद्यालयस्य गौरवञ्च वर्धते।



हिमसंस्कृतवार्ता

डॉ. वर्षा प्रकाश टोणगांवकर
लेखिका, पुणे (महाराष्ट्रम्)

'अनियन्त्रितेन्द्रियाणि'

जले गच्छन्ती नौकां विचलितुं द्वौ प्रकारौ वायु समर्था भवति। नौकां पथभ्रष्टं कृत्वा जलस्य भीषणे तरङ्गे भ्रामयति वा अगम्यतले/ अगाधे जले निमज्जयति। तथैव यस्य मनः इन्द्रियवशः नास्ति सः मनुष्यः बुद्ध्या परमात्मा स्वरूपे यदि स्थिरं कर्तुं इच्छति तर्हि तस्य इन्द्रियाः मनाकर्षणं कृत्वा मनुष्यस्य बुद्धि द्वौ प्रकारौ भ्रामयति-

[१] इन्द्रिया बुद्धिरुपी नौकां ईश्वरात् निराकृत्वा विविधान भोगान् प्राप्त्यर्थं उपायचिन्तने सज्जति। भीषणे तरङ्गे निमज्जयित्वा भ्रामयति च।

[२] द्वितीये पापेषु प्रवृत्तं कृत्वा तस्य अधःपत्तनं कृत्वा तां निमज्जयति च। एकाग्रचित्त भूत्वा ईश्वरभक्तिं आवश्यकी।

वार्ता-संवादः

हिमसंस्कृतवार्ताः, ईदरधीरजः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य के के विचित्राः वृत्तान्ताः प्रकाशिताः?

काव्या- नमस्ते नन्दिनि! अद्य जगतः अनेकाः विस्मयवाहिन्यः वार्ताः मया दृष्टाः। प्रथमं शृणु- बेल्जियमदेशे एकेन जनेन प्रमादेन महालेपः श्वासेन अन्तः गृहीतः। आश्चर्यं नाम, नव वर्षाणि यावत् सः लेपः तस्य फुप्फुसे अक्षतः एव संस्थितः! वैद्याः अपि एतत् ज्ञात्वा चकिताः सञ्जाताः।

नन्दिनी- अहो, भयङ्करम् एतत्! फुप्फुसे नव वर्षाणि यावत् लेपः संस्थितः, तथापि सः नरः जीवितः अस्ति इति महद् भाग्यम्।

अपरम् अपि कौतुकं शृणु- भारते मन्दिरात् बहिः कस्यचित् भक्तस्य पादरक्षे चौरेण अपहृते। तदा तेन नूतना युक्तिः आश्रिता; मन्दिरद्वारे एव उपविश्य दश-निमेष-वितरणसेवा उपयुक्ता। दशसु निमेषेषु मन्दिरस्य पुरतः नूतने पादरक्षे समुपस्थिते! सः ते धृत्वा आनन्देन गृहं गतः।

काव्या- अतीव सुन्दरम्! आधुनिकतन्त्रज्ञानेन असुविधा दूरीकृता।

अन्या वार्ता अपि विचित्रा अस्ति- चीनदेशे त्रिंशद्वर्षीयेन एकेन युवकेन चतुर्दश पुरातनाः स्वल्पमूल्याः प्रकोष्ठाः क्रीताः। ततः तेषां भाटकेन लब्धेन धनेन तेन पूर्णविश्रान्तिः स्वीकृता। सः उद्योगं त्यक्त्वा अधुना स्वैरं निवृत्तः जातः!

नन्दिनी- सत्यम्, अल्पीयसि वयसि एव तेन एतादृशी युक्तिः प्रदर्शिता, सर्वे युवानः विस्मयं गताः। अन्या एका हास्यकरी वार्ता अपि प्राप्ता। एकेन विवाह-माध्यम-तन्त्रांशेन घोषितम् यत्- "यदि अस्मन्-माध्यमेन निश्चित-समये विवाहः न संसिद्धः, तर्हि दत्तं सर्वं धनं प्रतिदत्तं भविष्यति!" इति। अनेन विचित्रेण नियमेन बहवः जनाः आकर्षिताः सञ्जाताः।

काव्या- हह! "विवाहः भवतु अथवा धन-प्रत्यावर्तनम्" इति वाणिज्य-बुद्धिः अतीव विचित्रा। एतादृश्यः मनोरञ्जिकाः वार्ताः त्वया सह चर्चिताः, अतः कृतज्ञताम् अर्पयामि तुभ्यम्।

नन्दिनी- मम सौभाग्यं काव्ये! श्वः पुनः मेलिष्यामः, तावत् शुभं भवतु।



हिमसंस्कृतवार्ता

असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

व्याकरणचिन्तनम्- ०६

मयट्-प्रत्ययः- विकारार्थे, अवयवार्थे च भवति।

सूत्रम् - तत्प्रकृतवचने मयट् ॥

मयट् = मय

यस्य विकारः, तस्मात् मयट्-प्रत्ययः भवति।

विंशतिसंस्कृतवाक्यानि, अभ्यासाय, मयट्- प्रत्ययेन अत्र प्रस्तूयन्ते। यथा-

१. मृण्मयम् मृद् + मयट् = मृण्मय।
एतत् मृण्मयं पात्रम् अस्ति। एवमेव-
२. सुवर्णमयं कुण्डलं शोभते।
३. रजतमयं चषकं गृह्णातु।
४. लौहमयं द्वारं दृढं भवति।
५. अत्र काष्ठमयं पीठं निर्मितम्।
६. प्रस्तरमयं मन्दिरं भव्यम् अस्ति।
७. लता स्वर्णमयं हारं धारयति।
८. माता ताम्रमयं कलशं स्थापयति।
९. अस्माभिः पाषाणमयी प्रतिमा पूज्यते।
१०. पूर्वं दारुमयानि गृहाणि आसन्।
११. ब्रह्म चिन्मयं, ज्योतिर्मयं च अस्ति।
१२. ज्ञानमयी भक्तिः प्रशस्यते।
१३. सर्वत्र आनन्दमयः परिवेशः भवतु।
१४. सदैव प्रेममयः परमेश्वरः स्मरणीयः।
१५. करुणामयी माता सर्वत्र पूज्यते।
१६. दयामयः भगवान् सर्वान् रक्षति।
१७. तेजोमयं सूर्यमण्डलं प्रकाशते।
१८. ज्योतिर्मयः दीपः अन्धकारं नाशयति।
१९. अमृतमयी वाणी सुखदा भवति।
२०. शान्तिमयं वातावरणं सर्वत्र भवेत्।

स्मरणीयम्- विकारः - येन निर्मितम्
मृदः विकारः = मृण्मयम्
प्राचुर्यम् - येन पूर्णम्
आनन्देन पूर्णम् = आनन्दमयम्
मयट्-प्रत्ययस्य रूपं - मय
पुंल्लिङ्गे - मयः - आनन्दमयः
स्त्रीलिङ्गे - मयी - आनन्दमयी
नपुंसकलिङ्गे - मयम् - आनन्दमयम्
इति।

दीपावली- भ्रातृद्वितीयापर्वणोः हार्दिक्यः शुभकामनाः



उत्तरप्रदेशसंस्कृतशिक्षकसङ्घस्य अध्यक्षः विनोद-कुमारमिश्रः, प्रदेशसङ्गठनमन्त्री वृजेशकुमारपाण्डेयश्च प्रदेशस्य समस्तेभ्यः शिक्षकबन्धुभ्यः, शिक्षिकाभगिनीभ्यः सर्वेभ्यः प्रदेशवासिभ्यश्च दीपावली-भ्रातृद्वितीयापर्वणोः हार्दिक्यः शुभकामनाः प्रेषितवन्तौ।

अस्मिन् दीपोत्सवस्य पावनावसरे उभौ पदाधिकारिणौ कामयतः यत् दीपावल्याः पवित्रः पर्व सर्वेषां जीवनानि सुखेन, शान्त्या, समृद्ध्या, सौभाग्येन च परिपूरयतु। सर्वेषां गृहेषु ज्ञानस्य, सद्भावस्य, प्रेम्णः, सकारात्मकतायाश्च दीपाः प्रज्वलिताः भवन्तु।

भ्रातृद्वितीयायाः पावनपर्वणि भ्रातृभगिन्योः पवित्रः स्नेहसम्बन्धः अधिकं सुदृढः भवतु। भगिन्यः स्वभ्रातॄणां दीर्घायुष्यं, उत्तमस्वास्थ्यं, सुखसमृद्धिं च कामयन्तु। भ्रातरः अपि स्वभगिनीनां सम्मानस्य, संरक्षणस्य, सुखस्य च सङ्कल्पं कुर्वन्तु। उभौ पदाधिकारिणौ अवदताम् यत् भारतीयसंस्कृतेः एतानि पर्वाणि सामाजिकैकतायाः, पारिवारिक- सौहार्दस्य, प्रेम्णः, परस्परसहयोगस्य च सन्देशं ददति। अतः सर्वैः प्रेम्णा, हर्षेण, उत्साहेन च एतानि पर्वाणि आचरितव्यानि।

अन्ते शविनोदकुमारमिश्रः, वृजेशकुमारपाण्डेयश्च पुनः एकवारम् उत्तरप्रदेशस्य समस्तेभ्यः शिक्षकबन्धुभ्यः, शिक्षिकाभगिनीभ्यः, प्रदेशवासिभ्यश्च दीपावली-भ्रातृद्वितीयापर्वणोः हार्दिक्यः शुभकामनाः प्रदाय सर्वेषां जीवनं सुखमयं, शान्तिमयं, समृद्धिमयं च भवतु इति शुभाशंसां कृतवन्तौ। शुभं दीपावलीपर्व। शुभं भ्रातृद्वितीयापर्व।

ज्योतिर्मयदीपोत्सवसुधा

हृदि प्रदीप्ता स्मृतिसारदीप्तिर्यस्याः कृतेऽपि भवति समग्रा। तस्याः स्मृतौ मे दिवसोऽपि सर्वो दीपावलीमेव सदा विधत्ते ।१।

दीपैर्दीपितमस्तु जीवनमिदं नस्सर्वदा भास्वरं
वर्णानां विभवैःसुवर्णसदृशैर्दिनं च रम्यं शुभम्।
अष्टलक्ष्मीकृपाप्रसादमधुरैस्संशोभितां मन्दिरं
धान्यैर्द्रव्यैश्च सान्द्रपूर्णमुदितं नित्यं सुखैर्वर्धितम्।२।

महालक्ष्मि! वरं देहि दीपावल्या दिने शुभं
सुखं सम्पत्समृद्धिञ्च सत्कर्मज्ञानमेव शम्।
नूतनगीतनिर्माणं मधुरस्वरतालकं
श्रीरामं सततं वन्दे सुखी स्याञ्च निरन्तरम्।३।

नक्षत्रेषु विभाति याऽभा शुभदा सम्यक् मनोव्योमनि
सुखस्यांकुरसंसारो विकसति क्षोण्यां च मद्वर्त्मनि।
कालस्यापि च यन्महोत्सवकरः स्पन्दस्सदा स्पन्दितो
दीपोऽसौ सततं भास्वरतनुर्भूयाद् दृढास्थाप्रदः।४।

गृहे गृहे दीपशिखा प्रदीप्ता मनस्सु सा नस्तनुते प्रकाशं,
द्वेषं विनाश्य प्रशमं प्रकुर्यात्ततः सुखञ्चापि भवेत्प्रशान्तम्। लक्ष्मीप्रवेशो भगवद्विशेषः सरस्वती देवी लसेच्छुभं शम्,

श्रीरामः कामं कुरुतात्सुकामं
दीपोत्सवेऽस्मिंस्तनुतात्प्रकाशम्।५।

अस्माकं कार्यजातं तु सततं भाग्यमावहेत्
पृथिव्यां परिवेशश्च सर्वथा सुन्दरो भवेत्।
सर्वेषां निलये सौख्यं सर्वश्च रमतां सदा
दीपज्वालेन पवैतत्पालयामोऽपि शं मुदा।६।

सत्यं विजयतेऽसत्यं धर्मस्यापि जयो भवेत्
तमस्सु चापि ज्योतिश्च विजयेत नु शाश्वतम्
दीपावलीदिने सौम्ये नो भवेच्छुभमङ्गलम्।
जानकीरमणो रामः प्रकुर्याच्छासनं शुभम्
शान्तिस्समृद्धिसद्भावस्सुखं च लसतान्नवम्
ॐ शान्तिस्समृद्धिसद्भावस्सुखं च लसतान्नवम्
ॐ शान्तिस्समृद्धिसद्भावस्सुखं च लसतान्नवम् ।७।

रचयिता - आचार्यः डा. रुरुकुमारमहापात्रः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः